Chapter-4

# चतुर्थं प्रकरणम्

## १.४.० वसिष्ठसंहितायां धर्मशास्त्रविचाराः

### १.४.१ आधानम्–

वृद्धवसिष्ठसंहिताग्रन्थे चतुर्विंशाध्याय आधानविषयेऽष्टाचत्वारिंशत्(४८)श्लोकाः सम्मिलिताः। तत्र मुख्यत्वेन अनुष्टुभ्, मालिनी, आर्या, इन्द्रवज्रा, शार्दूलविक्रीडितम् – एते छन्दाः प्रयुक्ताः सन्ति।

अत्राधानसम्बन्धितस्तथा च स्त्रीणां प्रथमरजोदर्शनतः फलं प्रदिष्टम्। अश्विन्यादिनक्षत्रे क्रमेण शुभाशुभफलं कथितम्। सर्वाः स्त्रियश्चन्द्रात्मिका तथा च सर्वे पुरुषा भास्करात्मकाः। अर्थात् सूर्यात्मकाः। अतश्चन्द्रवशेन स्त्रीणां रजस्तथा च सूर्यवशात् पुरुषाणां मध्ये वीर्यं भवेत्। यथा अर्केण भुक्तश्चन्द्रमा द्वादशांशैरुदितो भवति। तथा जन्मतो द्वादशांशे वर्षे स्त्रीणां रजोदर्शनं स्यात्। अत ऊर्ध्वमर्थाद् द्वादशवर्षात्पश्चात् त्रयोदशवर्षे क्रमेण प्रतिमासे त्रयोदशवर्षमारभ्य प्रत्येकमासे भौमचन्द्रयोर्योगेन स्त्रीणां रजोदर्शनं भवेत्। अनुपचयस्थाने स्थितश्चन्द्रमाः–१,२,४,५,७,८,१२ स्थानेषु स्थितः, चन्द्रमा भौमेन द्रष्टस्तदा स्त्रीणां रजोदर्शनं स्यात्।[४३]

सर्ववनितानां शुभाशुभं प्रथमरजोदर्शनतः फलमश्विन्यादिनक्षत्रानुसारेण क्रमेण निम्नलिखितानुसारेण भवति।[४४]

नक्षत्रम् फलम्

अश्विनी – या नारी अश्विनीनक्षत्रदिने प्रथमवारं रजस्वला स्यात् सा

---

४३ व.सं. अ.२४ श्लो. १ तः ४

४४ व.सं. अ.२४ श्लो. ५ तः ३१

बहुसन्तानयुता, धन–संपत्ति–शील–सौभाग्ययुक्ता निखिलदोषरहिता देव–गुरुभक्ता–मानिनी गीतनृत्याङ्गना श्रेष्ठपुष्पवस्त्राभूषणेन भूषिता स्यात्।

भरणी — या नारी भरणीनक्षत्रदिने प्रथमवारं रजस्वला स्यात्, सा परपुरुषासक्ता विविधचपलभाषायुता आभूषणेन युता कठोरवचनी नित्यानृतप्रस्तवाक्यवक्त्री विद्वेषिणी कुलजनगुणहीना छन्नपापकर्त्री तथा च दुष्टा स्यात्।

कृत्तिका — या नारी कृत्तिकानक्षत्रदिने प्रथमवारं रजस्वला स्यात्, सा बहुमित्रपुत्रा तथा धनेन युता सत्यवक्त्री गुणिनी विविधकामनायुता प्रियवादिनी कलाज्ञा तथा स्वकुले श्रेष्ठा स्यात्।

रोहिणी — या नारी रोहिणीनक्षत्रदिने प्रथमवारं रजस्वला स्यात्, सा सुन्दरगुणयुता सदाचारवती पतिप्रिया सत्यवक्त्री धनवती बन्धुप्रिय मानरता सुस्वरूपा चिन्ताहीना तथा चानेकेच्छायुता स्यात्।

मृगशीर्षम् — या नारी मृगशीर्षनक्षत्रदिने प्रथमवारं रजस्वला स्यात्, सा भाग्यवती सदाचारवती कलानुरक्ता विपुलधनयुता पतिप्रिया मानवती बहुज्ञानयुता तथा च बन्धुजनैः सुमान्या स्यात्।

आर्द्रा — या नारी आर्द्रानक्षत्रदिने प्रथमवारं रजस्वला स्यात्, सा विशाला मृषानुरक्ता नाम मिथ्याभिभाषिणी परकार्येष्वासक्ता भर्तृद्वारा त्याजिता प्रेष्यवती धनहीना परप्रिया दुःखयुक्ता तथा च पुत्रहीना स्यात्।

पुनर्वसुः — या नारी पुनर्वसुनक्षत्रदिने प्रथमवारं रजस्वला स्यात्, सा मायाविनी कार्पटिका कुचरित्रयुक्ता वन्ध्या पुनर्भूः (द्वितीयवारं विवाहिता)

परगृहेष्वासक्ता कलावती तथा च दुश्चेष्टिता नारी स्यात्।

पुष्यम् — या नारी पुष्यनक्षत्रदिने प्रथमवारं रजस्वला स्यात्, सा सुगन्धितपुष्पेन युता, वस्त्राभूषणेन युता सदैव कलागीतनिबद्धचित्ता अगम्यकर्त्री गतार्ता रोगरहिता सन्तानयुता तथा च दुष्प्रतिभान्विता सन्तानयुता स्यात्।

आश्लेषा — या नारी आश्लेषानक्षत्रदिने प्रथमवारं रजस्वला स्यात् ,सा दुष्टा पुनर्भूः बहुदोषासक्ता शीलरहिता मायावी लम्पटिका अर्थहीना स्वछन्दगा रोगयुक्ता तथा च कलाज्ञा स्यात्।

मघा — या नारी मघानक्षत्रदिने प्रथमवारं रजस्वला स्यात्, सा पतिप्रिया सन्तानयुता किन्तु कुलटा तथा च सिंहीव सर्वस्त्रीणां समुदाये प्रभाति, यथाकाशे खद्योतः।

पूर्वाफाल्गुनी — या नारी पूर्वाफाल्गुनीनक्षत्रदिने प्रथमवारं रजस्वला स्यात्, सा भाग्यवती बहुव्ययपरा पानप्रसक्तावृत्ता सज्जनानां कृते ईर्ष्यावती कुलटा कलासु निपुणा रोगरहिता नष्टव्रती दुष्टपुत्रयुता कुलकलाङ्किनी दुष्टरता भग्नोद्यमी पांशुला दुःखयुक्ता पापरता धर्महीना तथा च षण्ढप्रिया स्यात्।

उत्तराफाल्गुनी — या नारी उत्तराफाल्गुनीनक्षत्रदिने प्रथमवारं रजस्वला स्यात्, सा कुलद्वयानन्दकरी विभक्तकार्या कलाज्ञा चित्तनियन्त्रिता अनेककामनायुता रुचिरा सुवृत्ता सरला तथा च शत्रूणां प्रति वैरभावं न करोति, एतादृशी स्यात्।

हस्तम् — या नारी हस्तनक्षत्रदिने प्रथमवारं रजस्वला स्यात्, सा भोगिनी

शीलवती परकार्यकर्त्री बान्धवचित्ता श्रेष्ठगुणानुरवता गतेर्षा शत्रुरहिता तथा च विलोला नाम चञ्चला स्यात्।

चित्रा — या नारी चित्रानक्षत्रे प्रथमवारं रजस्वला स्यात्, सा प्रियालुः पतिप्रिया सुरतप्रिया वैरशत्रुतारता जनान् निगृह्यात्महिते नियोक्त्री रोगरहिता, किन्तु पीडिताङ्गी तथा च संगीतविद्याकलासु निपुणा स्यात्।

स्वाती — या नारी स्वातीनक्षत्रे प्रथमवारं रजस्वला स्यात्, सा दृढव्रती सत्यवक्त्री सुन्दराचरणकर्त्री वैराग्ययुक्ता परदोषगोप्त्री गजाभिगामिनी तथा च मङ्गलकार्येषु प्रमोदिनी स्यात्।

विशाखा — या नारी विशाखानक्षत्रदिने प्रथमवारं रजस्वला स्यात्, सा चञ्चलचित्तवती, असत्यवादिनी शत्रुसमूहरहिता विवादशीला विपुलप्रतापा तथा च शुनीव शश्वत् सम्भोगमाप्नोति।

अनुराधा — या नारी अनुराधानक्षत्रदिने प्रथमवारं रजस्वला स्यात्, सा मित्ररहिता रोगयुक्ता , अङ्गहीना विवादशीला गुणरहिता शत्रुयुक्तप्रवृत्तरागा प्रविकीर्णकामा तथा च स्वगर्भपातनशीला परेषु विरक्ता स्यात्।

ज्येष्ठा — या नारी ज्येष्ठानक्षत्रदिने प्रथमवारं रजस्वला स्यात्, सा कोधिनी निन्दिता, अतिव्यसनी सुगूढा परकष्टदायिनी परंतपा प्रव्राजिते रतात्मा परसन्तानानां प्रत्यसूयावती, ईर्ष्यावती तथा च पापिनी स्यात्।

मूलम् — या नारी मूलनक्षत्रदिने प्रथमवारं रजस्वला स्यात्, सा अधिककामयुक्ता तत्त्वहीना परप्राणबुभुक्षा, उद्धता एवं दोषचित्तवती निरन्तरदूषितकर्मवृत्ता सन्तानयुता तथा च गोगजगामिनी स्यात्।

पूर्वाषाढा — या नारी पूर्वाषाढानक्षत्रदिने प्रथमवारं रजस्वला स्यात्, सा विवादशीला

कलाकर्मणि दुष्टचित्ता, अन्येष्वासक्ता,अनुरक्ता,वनपर्वते विहारप्रिया प्रच्छन्नपापा तथा च कर्मरता स्यात्।

उत्तराषाढा — या नारी उत्तराषाढानक्षत्रदिने प्रथमवारं रजस्वला स्यात्, सा सुन्दराचरणकर्त्री महागुणैः सन्ततिवृद्धिकारिणी स्यात्। तथा च स्वपतेश्चित्तानुरता शत्रुरहिता दोषरहिताचरणकर्त्री स्यात्।

श्रवणं — या नारी श्रवणनक्षत्रदिने प्रथमवारं रजस्वला स्यात्, सा बहुपुत्र-धन-धान्येन शोभायमाना सुन्दराभूषणयुता प्रचुरगुणद्वारा स्वभर्तुरानन्ददा स्यात्। तथा च स्त्रीणां विचित्रश्रेष्ठा-गीत-नृत्य-वाद्यादिविज्ञात्री स्यात्।

धनिष्ठा — या नारी धनिष्ठानक्षत्रदिने प्रथमवारं रजस्वला स्यात्, सा अत्यधिकं भोगिनी धनिनी भाग्यवती मानिनी सच्चरित्रा निर्भया दुष्टाचरणवती सन्तताङ्गी गुणवती पतिहिते निरता बन्धुवर्गैः पूज्या तथा च पुण्यहितकर्मण्युत्सुका स्यात्।

शतभिषा — या नारी शतभिषानक्षत्रदिने प्रथमवारं रजस्वला स्यात्, सा निखिल-सुन्दरकलाज्ञा नृत्यगीतानुरक्ता विविधगुणैर्युता मानिनी भाग्ययुक्ता विविधपरिवारयुता तथा पतिकुलजनमान्या स्यात्।

पूर्वाभाद्रपदा — या नारी पूर्वाभाद्रपदानक्षत्रदिने प्रथमवारं रजस्वला स्यात्, सा शुभगुणहीना-कर्कशा-भाग्यहीना-अनृता तथा कठोरमन्त्रैर्दुर्जनान्त-र्जयन्ती सा दुर्भगा पितृगृहे विचरति। तथा च पितृगृहे निवसन् नष्टकामनायुतैवं रूपवती स्यात्।

| | |
|---|---|
| उत्तराभाद्रपदा | या नारी उत्तराभाद्रपदानक्षत्रदिने प्रथमवारं रजस्वला स्यात्, सा गुणपुत्रसंपत्तियुता सुशोभिताङ्गा सर्वज्ञा सपत्नजनानां मानयन्ती मृदु-मधुर-सुवाचा गीतनृत्येषूद्यता सा बहुकलाज्ञा स्यात्। |
| रेवती | या नारी रेवतीनक्षत्रदिने प्रथमवारं रजस्वला स्यात्, सा नष्टशीलयुता बहुदु:खशोका विवादशीला पितृगृहे निवसन् पराभितप्ता पतिपुत्रदूरा नीचजनै रता तथा च कार्पटिका कन्या स्यात्। |

**अथ वारपरत्वे कन्यायां प्रथमरजोदर्शनतः शुभाशुभफलम्**[४५] -

| वार : | | फलम् |
|---|---|---|
| रविवार: | – | रोगेन पीडिता स्यात्। |
| सोमवार: | – | पतिव्रता स्यात्। |
| भौमवार: | – | वन्ध्या स्यात्। |
| बुधवार: | – | सन्तानयुता स्यात्। |
| गुरुवार: | – | अधिकधनयुता स्यात्। |
| शुक्रवार: | – | अधिक-आनन्दकर्त्री स्यात्। |
| शनिवार: | – | वेश्या (असती) स्यात् । |

रिक्तातिथिषु (४,९,१४ तिथौ), पर्वदिने (पूर्णिमा, अमावस्या, अष्टमी, सूर्यसन्क्रान्तिदिने), षष्ठ्यां तिथौ, द्वादशीतिथौ, व्यतीपाते, विष्टियोगे, एकार्गले परिघे, वैधृतियोगे, उत्पातसमये तथा च प्रात:सायंसंध्यासमये प्रथमरजोदर्शनमनिष्टकारी स्यात्।[४६]

---

४५ व.सं. अ.२४ श्लो. ३३

४६ व.सं. अ.२४ श्लो. ३२

यदि कन्यायाः प्रथमरजोदर्शनकाले, तत्समये लग्ने -लग्नस्थाने शुभग्रहाणां वर्गः स्थितस्तदा सा कन्यानायासेनारोग्यं तथा सौभाग्यं प्राप्नोति। तथा च पापग्रहाणां वर्गैरत्यन्त्यतदु:खिता, रोगी , अनर्थविवादशीला तथा दुष्टबुद्धिमती स्यात्। नक्षत्रं-वारः-तिथिः-योगा दिनार्धकालः(मध्याह्नं) एतत् सर्वं षड्वर्गकथितफलानुसारेणेष्टानिष्टफलदं स्यात्। अतोऽल्पदोषं पुनरधिकगुणं च ज्ञात्वा गुणोत्तमपरं शुभकर्म कार्यम्। पुष्पवती कन्या प्रथमदिने चाण्डाली, द्वितीयदिने पतितासमा, तृतीयदिने रजकी तथा च चतुर्थदिने शूद्रा स्यात्। सा पुष्पवती कन्या पञ्चमदिने हव्येषु कव्येषु च शुद्धा स्यात्। यदि पञ्चमदिने दुष्टवाराः-रवि-भौम-शनिवाराः स्युः, तदा नवोदकुम्भसलिलैरथवा पञ्चकलशैः समृद्धिजलैः सन्मन्त्रितैरौषधैः स्नानं कार्यम्। तत् पापं नाशयति।[४७] ऐशान्यामतो गोमयमण्डलं कृत्वा लेपनं कुर्यात्। अग्नौ दुर्गां जुहुयात् । समित्प्रमाणमष्टसहस्रसंख्यैर्गायत्रीहवनं कुर्यात्। शतप्रमाणं शुभ-यव-तिलमिश्रित-व्याहृतिभिर्हवनं कुर्यात्, ततो देव-द्विजपितॄणामन्नसुवर्णवस्त्रैः सन्तर्पयेत्।[४८]

**गर्भाधाने विशेषः —** पौष्णद्वये (रेवती-अश्विनीनक्षत्रयोः), पैतृभे (मघा), याम्यं (भरणी), आर्द्रा-आश्लेषा-श्रवण-धनिष्ठा, अष्टममेवं जन्मदिने जन्मनक्षत्रदिन उत्पाते तथा पापग्रहदूषितेषु, अनिष्टलग्ने गर्भाधानं न कार्यम्। उपप्लवे, वैधृति-व्यतीपात-भद्रादिने, परिघयोगस्य पूर्वभागे, प्रातःसायंसंध्यासमये पर्वदिने (पौर्णिमा-अमावस्या-अष्टमी-सूर्यसंक्रान्तिदिने-) तथा मातापितृश्राद्धदिने पत्नीगमनं विवर्जयेत्। पुत्रमिच्छन् नरो दिनेषु युग्मेषु (समदिनेषु २,४,६,८,१०,१२,१४,१६ ) तथा च कन्यामिच्छन् नरः दिनेष्वयुग्मेषु (विषमदिनेषु ५,७,९,११,१३,१५) स्वसतीमुपेयात्। स्वपत्नीगमनमाधानकार्यार्थे कुर्यात्। तत्र गण्डान्ततिथिः, लग्नं तथा नक्षत्रं त्याज्यम्। आधानलग्नं विषमराशौ/नवांशे गुरुचन्द्रयोर्युतं

४७ व.सं. अ.२४ श्लो. ३४ थः ३७

४८ व.सं. अ.२४ श्लो. ३८ थः ३९

दृष्टं, तदा सुन्दरसन्तानप्राप्तिः स्यात्। अन्ययोगे पापग्रहयुतैः, मिश्रैः, बलिभिर्वा पुत्रसन्तानप्राप्तिर्न स्यात्। युग्मांशलग्ने(समराशौ) लग्ननवांशे बली शुक्रेण चन्द्रमसा युते दृष्टे वा, तदा सुन्दरकन्यारत्नप्राप्तिः स्यात्। विषमनक्षत्रे, नवांशलग्ने वा बलयुक्ते गुरौ चन्द्रमसि सूर्ये मङ्गले वा विषमराश्यांशे स्थिते पुत्रजन्म स्यात्। विपरीतेन कन्या तथा च मिश्रैः षण्ढो द्व्यङ्गैर्द्वित्रिजन्म वा स्यात्। विषमनवांशे, नक्षत्रे तथा विषमस्थाने यदि शनिः स्थितस्तदा एकैव पुत्रजन्म स्यात्। एतत्प्रकारैः पुरुषग्रहाणां विचारं कुर्वन् पुत्रस्य, पुत्रिकाया वा जन्मयोगं कथयेत्। चन्द्रार्कपुत्रक्षितिजैः (चन्द्रमाः, शनिः, भौमः) स्वनवांशे स्थिते तथा च गुरोर्धर्मविलग्नपुत्रगे (९, १, ५ स्थाने) वा स्थिते, एतेषु योगेष्वपत्ययोगः स्यात्। तत्र निश्चयेन सन्तानप्राप्तिः स्यात्, किन्तु निर्बीजानां विफलता भवेत्। दशमरात्रिं त्यक्त्वा पुरुषः स्त्रीणामृतोरुपेक्षां न कुर्यात्। ऋतुः षोडशदिनपर्यन्तं स्थितस्तत्र प्रथमत्रितयरात्रौ पत्नीगमनं न कुर्यात्।[४९]

## १.४.२ पुंसवनं सीमन्तश्च -

वृद्धवसिष्ठसंहिताग्रन्थे पञ्चविंशत्यध्याये पुंसवनसीमन्तविषयौ सप्तदशश्लोकैर्वर्णितौ। यदा गर्भविषये निश्चितिस्तदा गर्भस्य तृतीयमासे पुंसवनसंस्कारं कुर्यात्। तृतीयमासे बलयुक्तलग्ने यदा चन्द्रमाः पुष्ये, श्रवणे नक्षत्रे वा स्थितः, कर्क-मिथुन-कन्या-लग्नं त्यक्त्वा रिक्तातिथिरहित-(४-९-१४)तिथिषु लग्नतोऽष्टमस्थाने पापग्रहरहिते तथा शुक्र-सोम-बुध-गुरुवासरेषु पुंसवनसंस्कारं कुर्यात्। लग्ने स्थितश्चन्द्रमा अत्यन्तं सम्पत्तिप्रदानं करोति। यत्समये लग्ने स्थितश्चन्द्रमाः शुभग्रहेण दृष्टो युतो वा तत्समये कृताभ्यां सीमन्तपुंसवनसंस्काराभ्यां मनुजानां सम्पत्तिप्राप्तिर्भवति। श्रवण-पुष्य-स्वाती-हस्त-पुनर्वसु-मूल-रेवती-अनुराधा-मृगशीर्ष-अश्विनी-नक्षत्राणि पुरुषसंज्ञकनक्षत्राणि स्युः। पतिव्रता

---

४९ व.सं. अ.२४ श्लो. ४० तः ४८

स्त्रीणामाद्यगर्भे पुंसवनसंस्कारः। पश्चात् सीमन्तोन्नयनसंस्कारः गर्भस्य चतुर्थ-षष्ठ-अष्टमे वा मासे कुर्यात्। यत्समये चन्द्रमास्तथान्यग्रहा बलिनः स्युस्तथा बलयुक्तमासस्वामिनो मासः स्यात्, तदा सीमन्तोन्नयनसंस्कारं कुर्वन्, अत्यन्तगुणयुक्तसन्तानं प्राप्नोति। मासे मासे मासाधिपादिग्रहाणां शान्तिः शान्तिवाक्यैः जपैश्च होमैर्दानैस्तथा च सज्जनानां वाक्यैर्गर्भे पुत्रमिच्छन् मनुजो गर्भं सम्यग्रक्षयेत्। साधारणसंज्ञकानि (कृत्तिका, विशाखा), दारुणसंज्ञकानि (आर्द्रा, आश्लेषा, ज्येष्ठा, मूलं), तथा उग्रसंज्ञकानि (पू.फा., पू.षाढा, पू.भा., भरणी, मघा) नक्षत्राणि त्यक्त्वा, रविवार-गुरुवार-भौमवारेषु, रिक्तातिथिं(४-९-१४) तथा पञ्चपर्वदिनानि (पौर्णिमा, अमावस्या, अष्टमी, सूर्यसंक्रान्तिदिनं) विवर्ज्य, पुरुषसंज्ञकनक्षत्रे लग्ने नवांशे स्थिते (श्रवणं, पुष्यः, स्वाती, हस्तं, पुनर्वसु, मूलं, रेवती, अनुराधा, मृगशीर्षं, अश्विनी) एतेषु योगेषु सीमन्तोन्नयनसंस्कारं कुर्यात्। नैधनतारां तथाष्टमलग्नं विहाय शुद्धलग्ने, शुभग्रहैर्युते/दृष्टे वा तथा च पञ्चेष्टलग्ने, अथवा पूर्वोक्तकथितचतुर्ग्रहाः शुद्धास्तदा सीमन्तोन्नयनसंस्कारकरणं शुभावहम्। केन्द्रे(१,४,७,१०), त्रिकोणे(५,९), तृतीये, द्वितीये, एकादशे(३,२,११) वा स्थाने सौम्यग्रहाः स्थिताः, तृतीये, षष्ठे, एकादशे (३,६,११) वा स्थाने पापग्रहाः स्थिताः, षडाष्टकलग्ने तथा चान्त्यस्थानविवर्जिते चन्द्रमसि – एतेषु योगेषु सीमन्तोन्नयनसंस्कारः सदैव शुभदः। यदि द्वादशे, अष्टमे वा, पञ्चमे लग्न एकोऽपि पापग्रहः स्थितः, तदा स्त्रीणां सीमन्तोन्नयनसंस्कारः कार्यः। तेन गर्भिणी अथवा तस्य गर्भस्थशिशोर्मध्ये कदापि विनाशो भवति।[५०] गर्भिणीस्त्रीणां प्रथममासे शुक्रः, द्वितीयमासे भौमः, तृतीयमासे गुरुः, चतुर्थमासे सूर्यः, पञ्चमे मासे चन्द्रमाः, षष्ठमासे शनिः, सप्तममासे बुधः, अष्टममासे लग्नेशः, नवममासे चन्द्रमाः, तथा च दशममासे सूर्यः- इत्थं दश मासानां मासाधिपाः स्युः। यदि मासस्वामी स्वमासे पीडितः

---

५० व.सं. अ.२५ श्लो. १ तः ९

स्यात्, तदा तन्मासे गर्भं नाशयति। रोहिणी–श्रवणनक्षत्रयोः, शुक्लपक्षस्य द्वादशी–सप्तमीतिथ्योर्मध्याह्नकालेऽथवा पूर्वाह्णेऽनुकूलसमये गर्भपुष्ट्यर्थं विष्णोः पूजां कारयेत्। पीतवस्त्रधारणकारिणीं, कृष्णवर्णां शङ्ख–चक्र–गदा–पद्मधारिणीं वैकुण्ठवासिनर्विष्णोः प्रतिमां मृत्कुम्भे विन्यसेत्। विष्णुस्वरूपा सुवर्णप्रतिमा विष्णुचिह्नेन तथा मन्त्रैर्गन्ध–पुष्प –वस्त्र–अक्षता–गुग्गुल–धूप–दीप–नैवेद्य–ताम्बूल–फलैश्च सम्यक् पूजयेत्। विष्णुदेवस्य पूजा गर्भरक्षणाय कारयेत्। पुनः वस्त्रसंयुतां तां सुवर्णविष्णुप्रतिमां ब्राह्मणेभ्यः प्रदापयेत्।[५१]

## १.४.३ जातकर्म नामकर्म च -

वृद्धवसिष्ठसंहिताग्रन्थे षडविंशत्यध्याये जातकर्मनामकर्मविषये चतुःश्लोकाः सम्मिलिताः। यस्मिन्मुहूर्ते कुमारजातस्तस्मिन्मुहूर्ते कुमारस्य जातकर्म विधेयम्। सूतके विनिर्गते वा तस्मिन्दिने तस्य च नामधेयम्।[५२]

चैत्रादिमासानां नामानि क्रमेण वैकुण्ठ–जनार्दन–उपेन्द्र–यज्ञपुरुष–वासुदेव–त्रिविक्रम–योगीश–पुण्डरीकाक्ष–कृष्ण–अनन्त–अच्युत–चक्रधारी–इत्यादीनि चैत्रादिमासक्रमेण ज्ञेयानीति विद्वज्जनाः कथयन्ति। तद् द्व्यक्षरं, चतुरक्षरं, लकारयुतं तथा रेफयुतानि नामानि त्यक्त्वा, तत्तन्मासनामादिकं विचिन्त्य जातकस्य दक्षिणकर्णे नाम कथयेत्।[५३]

देवान् पितॄन् सन्तर्प्य, द्विजांश्च सुवर्ण–गो–भू–तिल–भूमि–कांस–वस्त्र–गुड–इज्य–रौप्य–लवणानां दानं कृत्वा, रक्षोघ्नमन्त्रैः सह जातकर्म विधेयम्। अतीतकार्याण्यखिलानि तानि कार्याणि। जातकर्म उत्तरायणे स्थिते सूर्ये, शुक्लपक्षे, गुरुशुक्रयोरुदयकाले तथा क्षयतिथिं

---

५१ व.सं. अ.२५ श्लो. १० तः १४

५२ व.सं. अ.२६ श्लो. १

५३ व.सं. अ.२५ श्लो. १५ तः १७

त्यक्त्वा कस्मिन्नपि शुद्धपञ्चाङ्गदिने कुर्यात्। ध्रुवसंज्ञक(उ.फा., उ.षाढा, उ.भा., रोहिणी), मृदुसंज्ञक(मृगशीर्षं, चित्रा, अनुराधा, रेवती), क्षिप्रसंज्ञक (अश्विनी, पुष्यं, हस्तः), चरसंज्ञक(पुनर्वसु, स्वाती, श्रवणं, धनिष्ठा, शतभिषा) नक्षत्रेषु, पर्वकालमेवं रिक्तातिथिं(४-९-१४) त्यक्त्वा, शुभग्रहाणां वारेषु /लग्नेषु / वर्गेषु - एतेषु योगेषु जातकर्मनामकरणसंस्कारौ कुर्यात्।[५४]

## १.४.४ अन्नप्राशनम् --

वृद्धवसिष्ठसंहिताग्रन्थे सप्तविंशत्यध्यायेऽन्नप्राशनविषयका दश (१०) श्लोकाः सन्ति। षष्ठमासात् संवत्सरपर्यन्तं युग्मेषु मासेषु नाम सममासेषु - ६, ८, १०, १२ मासेषु बालकानां (शिशूनां) तथा अयुग्ममासेषु नाम विषममासेषु ७, ९ ११ मासेषु बालिकानां(कन्यकानां) नवान्नप्राशनं कल्याणकारी स्यात्। ध्रुवसंज्ञक (उ.फा., उ.षाढा, उ.भा., रोहिणी), मृदुसंज्ञक (मृगशीर्षं, चित्रा, अनुराधा, रेवती), क्षिप्रसंज्ञक (अश्विनी, पुष्यं, हस्तः), चरसंज्ञक (पुनर्वसु, स्वाती, श्रवणं, धनिष्ठा, शतभिषा)नक्षत्रेषु, शुक्रवारः, गुरुवारः, बुधवारः- एतेषु दिनेषु, दशमी - सप्तमी - तृतीया – पञ्चमी - द्वितीया – त्रयोदशीतिथौ (धर्म-अर्क-गौरी-अहि-धातृ-कामतिथौ), तथा ताराचन्द्रबलान्वितेषु - एतेषु सर्वयोगेषु अन्नप्राशनसंस्कारं कुर्यात् । शुभग्रहाणां राशौ तथा नवांशलग्ने स्थिते, दिनस्य पूर्वार्धे तथा पूर्णचन्द्रवारे-पौर्णिमादिने अथवा पूर्णचन्द्रलग्ने नवांशे वा स्थिते, तदान्नप्राशनसंस्कारः शुभावहः। निधनतारां त्यक्त्वा, कर्मस्थानविशुद्धियुक्ते(दशमस्थाने शुद्धे, दोषहीने) तथा शुभग्रहाणां दृष्टेऽथवा शुभग्रहैर्युते, नोत्पातपापग्रहदूषितर्क्षे तथा

---

५४ व.सं. अ.२६ श्लो. १ तः ४

वैनाशिकादिनक्षत्रविवर्जितेऽन्नप्राशनसंस्कारः शुभावहः। चौलकर्म-अन्नप्राशन-व्रतबन्ध(उपनयन)-राज्याभिषेकादिकार्येषु जन्मनक्षत्रं शुभम्। किन्तु विवाह-सीमन्तोन्नयन-यात्रादिमाङ्गलिककार्येषु जन्मनक्षत्रमनिष्टं, अतः सदा त्याज्यम्। शुभैवमशुभा ग्रहा यदि त्रि(३)-धन(२)-आय(११)-केन्द्र(१,४,७,१०)-त्रिकोण(५,९)स्थाने तथा लाभ(११) रिपु(६), त्रि(३)स्थाने गताः, चन्द्रमाः षष्ठ(६)-रिःफ(१२)-अष्ट(८)- स्थानानि विहायान्यस्थाने स्थितस्तदा बालकानामन्नप्राशनं सदा शुभकारि स्यात्। अन्नप्राशनसमये यदि लग्ने सूर्यस्थितस्तदा कुष्ठरोगेण, क्षीणचन्द्रकारणेन भिक्षुकः, पूर्णचन्द्रे सुन्दरः, भौमकारणेन पित्तरोगेन पीडितः, बुधकारणेन ज्ञानी, गुरुकारणेन भोगी, शुक्रकारणेन दीर्घायुः,भोग्यवान्, शनिकारणेन वातरोगी तथा राहुकारणेन बालकोऽन्नविवर्जितः स्यात्। पूर्णिमात अष्टमीपर्यन्तं चन्द्रमाः पूर्णचन्द्रमाः कथ्यते। अमावस्यात अष्टमीपर्यन्तं चन्द्रमाः क्षीणचन्द्रमाः कथ्यते। लग्नतः षष्ठेऽष्टमे वा स्थाने चन्द्रमाः स्थितः, तत्समये यदि प्रथमवारमन्नप्राशनं क्रियते, तदा बालकस्य मृत्युर्भवेत्। तथा यदि केन्द्रे, त्रिकोणे वा शनिः स्यात्, तदान्नमपहारकं स्यात्।[५५]

### १.४.५ चौलम् -

वृद्धवसिष्ठसंहिताग्रन्थेऽष्टाविंशत्यध्याये चौलसंस्कारो द्वादश श्लोकैवर्णितः। पञ्चमे, तृतीये वर्षे वा स्वकुलाचारानुसारेण यत्नेन स्वगृह्योक्तविधानतः शिशूनां चौलसंस्कार विधेयः।

आधानतो जन्मतो वा सप्तमवर्षेऽपि बालकस्य चौलसंस्कारं कारयेत्, प्रथममाभ्युदयिकं कर्म कृत्वा पश्चात् सर्वं समाचरेत्। सूर्यस्योत्तरायणगते शुभे दिने, गुरौ शुक्रे नास्तमिते, चन्द्रताराबलोपेते, शुभलग्ने शुभांशके शिशूनां चौलसंस्कारं कारयेत्, तत्

---

५५ व.सं. अ.२७ श्लो. १ तः १०

शुभावहम्। यदि माता गर्भयुक्ता, पञ्चमासाधिको गर्भः स्यात् तदा चौलसंस्कारं न कारयेत्। यदि पञ्चमासाधिको गर्भस्तदा गर्भिणीपतिर्गृहनिर्माणं समुद्रस्नानं चौलसंस्कारं तीर्थयात्रां तथा स्वश्मश्रु-आदिकं न कुर्यात्। यदि पुत्रचूडाकरणे माता गर्भिणी भवेत्, तदा बालको दम्पती गुरुश्चैव विपत्तियुक्तः स्यात्। तत्काले वेदकार्यं, शताभिषेककार्यं कुर्वन्नपि चौलकर्मसंस्कारं न कुर्यात्। चूडाकर्मविधिः सर्वेषां वर्णानां-ब्राह्मण-क्षत्रिय-वैश्य-शूद्रादिचतुर्वर्णानां स्मृतः। केशाग्रभागो जनन्यास्तथा केशमूलभागः पितुर्ज्ञेयः। चौलसंस्कारद्वारायुर्वृद्धिं गच्छति तथा च न करण आयुः क्षयं गच्छति। अतः प्रयत्नेन बुद्धिमान् जनश्चौलसंस्कारं कारयेत्। पञ्चमी-सप्तमी-एकादशी-दशमी-त्रयोदशी-तृतीया-तिथिश्चौलकर्मणि शुभावहा ज्ञेया। विधातृद्वितये(रोहिणी-मृगशीर्षनक्षत्रयोः) सार्पात् त्रितये च चतुष्टये(आश्लेषा-मघा-पूर्वाफाल्गुनी-उत्तराफाल्गुन्योः), धर्मदर्शदिने (दशमी-अमावस्यादिने), कृष्णाद्यवासरे(कृष्णप्रतिपत्तिथौ), दिनसमये चौलकर्म श्रेष्ठम्। अदितिद्वितये (पुनर्वसु-पुष्ययोः), पौष्णद्वितये(रेवती-अश्विन्योः), श्रवणत्रये(श्रवण-धनिष्ठा-शतभिषासु), हस्ताच्च त्रितये(हस्त-चित्रा-स्वातीषु) शाक्रे(ज्येष्ठे)- एतेषु नक्षत्रेषु चन्द्रमा भवति, तदा चौलकर्म शुभावहम्। शुक्र-गुरु-बुधवासरेषु शुभदिने शुभलग्ने तथा शुभनवांशेषु सम्यग्विचार्य चौलकर्म कारयेत्।[५६]

## १.४.६ उपनयनम् -

वृद्धवसिष्ठसंहिताग्रन्थ एकोनत्रिंशदध्याय उपनयनसंबद्धा एकोनाशीति(७९) श्लोकाः सम्मिलिताः।

श्रुतिस्मृतीनामुत्तमपदं द्विजस्तथा द्विजस्योत्तमत्वं व्रतबन्धः। तस्माद् द्विजानामुत्तमत्वं

---

५६ व.सं. अ.२८ श्लो. १ तः १२

लग्नशुद्धिकारणेन स्यात्। अतो ज्योतिषशास्त्रानुसारेण लग्नशुद्धिं ज्ञात्वा द्विजानां तद्वाप्तिकारणं शास्त्रत: कथयेत्।[५७]

गर्भाधानात्, जन्मतो वा अष्टमे वर्षे ब्राह्मणानां मौञ्जीबन्ध: शस्यते। भूमीशानां-क्षत्रियाणां कृत एकादशवर्षे तथा च वैश्यानां द्वादशवर्षे मौञ्जीबन्ध:-उपनयनं श्रेष्ठमिति वेदेषु कथितम्। विप्राणामुपनयनसंस्कारो वसन्त-ऋतौ, क्षत्रियाणां ग्रीष्म-ऋतौ, तथा च वैश्यानां शरदृतौ कारयेत्, तच्छ्रेष्ठम्। तथा च साधारणजनानां माघादिपञ्चमासेषूपनयनसंस्कारं कारयेत्, तच्छ्रेष्ठम्। ऋग्वेदादिचतुर्वेदानां स्वामिन: क्रमेण गुरु-शुक्र-भौम-बुधा वर्तन्ते। ऋग्वेदस्य स्वामी गुरु:, यजुर्वेदस्य शुक्र:, सामवेदस्य भौमस्तथा चाथर्ववेदस्य शाखास्वामी बुध: स्यात्। यदि शाखेशस्वामी गुरु: शुक्रो यदि प्रौढ्ये, बाल्ये, वार्धक्ये वा स्थित:, अथवा वर्णेशो दुर्बलस्तदोपनयनसंस्कारं न कुर्यात्। शाखेश्वरस्ववर्णेशगुरूणां बलं ज्ञात्वा, मुख्याचार्यशिष्ययोर्गुरुबलं विचार्योपनयनसंस्कारं कुर्यात्। यद्युक्तवर्षे गुरुर्बली न स्यात्, तदा शान्तिकं कर्म कृत्वा व्रतबन्धकर्म प्रशस्तम्। यदि शाखास्वामी, गुरुस्तथा शुक्र एकस्मिन्स्थाने शत्रुद्वारा पराजित:, तदा विद्याव्रतार्थिभिस्तन्मासे, वर्ष उपनयनसंस्कारं न कुर्यात्। शाखास्वामी, गुरु: शुक्रो वा यदि स्वनीचगृहे संस्थितस्तदोपनीतबालकस्य विद्या-वृत्तहेतोरुपनयनसंस्कारं वर्जयेत्। नीचांशे स्थित: शुक्र:, गुरुस्तथा शाखास्वामिनोऽपि स्वकुलाचारानुसारेण नीचकर्मरतजनानां व्रतबन्ध: श्रेष्ठ:। नीचराशौ/नीचांशे स्थिते/नीचनवांशे स्थिते, शाखेश्वर-गुरुशुक्रकारणेन हीनकुलप्रसक्त: स्वकुलं विसृज्य शस्त्रोपजीवी जन: स्वशिशूनां व्रतबन्धं कारयेत्, तच्छ्रेष्ठम्। यदि शाखेश्वरो गुरु:, शुक्रो वा स्वशत्रु-नीचराशौ स्थितस्तत्समये बाल उपनीतस्तदा स बाल: क्षिप्रमन्त्यजानां सेवको भवति। यदि शाखेश्वरो गुरु-शुक्राणां मध्ये कोऽप्येको शत्रुराशौ स्थितस्तदोपनीत: शिशु: परदारासु निरत:(परस्त्री-आसक्त:)स्यात्। यदि

---

५७ व.सं. अ.२९ श्लो. १

शाखेशो गुरुशुक्रयोर्मध्ये कोऽप्येको शुक्रनवांशे स्थितस्तत्समये यदि बालकस्योपनयनसंस्कारं कुर्यात् ,तदा स बालो मूर्खो दुष्टश्च भवेत्। शत्रुराशौ, शत्रु-अंशे स्थितो ग्रहो, यदि शाखेश्वरो-गुरुः शुक्रो वा स्यात्, तथा तत्समये यदि बालकस्योपनयनं कुर्यात्, तदा स बालो महापातककर्ता भवेत्। अधिशत्रुगृहस्थस्तदंशस्थो वा यदि शाखेश्वरो गुरुः शुक्रो वा स्यात्, तथा तत्समये यदि बालकस्योपनयनं कुर्यात्, तदा स बालश्चाण्डालसेवकः स्यात्। शाखेश्वरो गुरुः, शुक्रो वा यदि शत्रुनीचांशे, अधिशत्रुनक्षत्रे वा स्वांशे वा स्वोच्चभागे गतस्तदोपनीतबालो नीचफलं न प्राप्नोति। शाखेशो गुरुः, शुक्रो वा स्वमित्रराशौ संस्थितः, स्वमित्रांशे वा संस्थितस्तत्समये यदि बालकस्योपनयनसंस्कारं कुर्यात् , स बालो विद्यायुतो विद्वान् स्यात्। शाखेशो गुरुः, शुक्रो वा मित्रगृहे संस्थितस्तत्समये यदि बालकस्योपनयनसंस्कारं कुर्यात्, स बालो विद्वान् स्यात्। यद्यधिमित्रगृहे, अधिमित्रनवांशे वा स्थितस्तदा स बालो धन-विद्याप्राप्तकर्ता स्यात्। यदि स्वाधिमित्रगृहे, अथवा स्वाधिमित्रांशनवांशे स्थितः शाखेशो, गुरुः, शुक्रः स्यात्, तत्समय उपनयनसंस्कारं कुर्वन् उपनीतबालो विद्याविशारदः स्यात्। यदि, शाखाधिपो, गुरौ, शुक्रे वा स्वोच्चनवांशे स्थितस्तत्समये यदि बालकस्योपनयनसंस्कारं कुर्यात्, तदा उपनीतबालो विद्यावान्, धनवान् भवेत्। यदि शाखाधिपो गुरुः, शुक्रो वा स्वतुङ्ग-तुङ्गांशगतः(स्वोच्चनवांशे स्थितः), तत्समये यदि बालकस्योपनयनसंस्कारं कुर्यात्, तदोपनीत- बालो धन-आयुष्य-व्रत-विद्यादिभिर्युक्तो भवेत्। यदि चन्द्रमाः सूर्यांशकगतस्तत्समये बालकस्योपनयनसंस्कारं कृत्वोपनीतबालो महापातककृद् भवेत्। यदि चन्द्रमाः स्वांशे स्थितस्तदा पण्योपजीवी तथा च चन्द्रमा यदि नीचराशौ स्थितस्तदोपनीतबालो धनहीन एवं दुष्टः स्यात्। उपनयनकाले यदि चन्द्रमाः श्रवण-पुनर्वसुनक्षत्रे वा, कर्कराशौ नवांशे स्थितस्तदा स उपनीतबालो विद्यावान्, धनवान्, श्रीमान् भोगवान् तथा व्रती स्यात्। भौमनवांशे स्थितश्चन्द्रमास्तत्समये यदि बालकस्योपनयनसंस्कारं कुर्यात्, तदा स उपनीतबालः

शस्त्रजीवी तथा दुष्टः स्यात्। बुधनवांशे स्थितश्चन्द्रमास्तत्समये यदि बालकस्योपनयनसंस्कारं कुर्यात्, तदा स उपनीतबालो वेदधारी निपुणः स्यात्। गुरोर्नवांशे स्थितश्चन्द्रमास्तत्समये यदि बालकस्योपनयनसंस्कारं कुर्यात्, तदा स उपनीतबालो वेदाङ्गविशारदः स्यात्। शुक्रनवांशे स्थितश्चन्द्रमास्तत्समये यदि बालकस्योपनयनसंस्कारं कुर्यात्, तदा स उपनीतबालो धनवान्, दाता तथा च विद्या-वित्तविशारदः स्यात्। शुक्रकारणेन शीघ्रविवाहकर्ता, दाता, यज्ञकार्यकर्ता तथा च भोगवान् भवेत्। शनिनवांशे स्थितश्चन्द्रमास्तत्समये यदि बालकस्योपनयनसंस्कारं कुर्यात्, तदा स उपनीतबालश्चाण्डालसेवकः स्यात्। यदि पापग्रहाणां नवांशे, स्वाधिनीचस्थितश्चन्द्रमास्तत्समये यदि बालकस्योपनयनसंस्कारं कुर्यात्, तदा स उपनीतबालोऽनध्यायोपनीतश्च पुनः संस्कारमर्हति। कृष्णप्रतिपत्तिथौ दिने नैमित्तिकमनध्यायं कुर्यात्। सा मेखलाबन्धने चौलसंस्कारे वेदव्रतेष्वपि प्रशस्ता। कृष्णप्रतिपत्तिथिर्यदि पूर्वापरासंयुता तदा श्रेष्ठा कथ्यते। चातुर्मासस्य द्वितीयायां, तृतीयायां तिथौ तथाक्षयतिथाववुपनयनसंस्कारः प्रशस्तः। यो बाल उपनीतो, स श्रीमान्, विद्यावान्, धनवान् भवेत्। व्रतबन्धनस्य पूर्वसंध्यायां यदि वारिदो गर्जति, तदा तद्दिनेऽनध्यायः स्यात्। अतो व्रतबन्धं विवर्जयेत्। तद्दिन उपनयनसंस्कारो त्याज्यः। कृष्णपक्षे चतुर्थी, सप्तम्यादिदिनत्रयम्(सप्तमी, अष्टमी, नवमी), त्रयोदशीचतुष्कं(त्रयोदशी, चतुर्दशी, अमावस्या, शुक्लपक्षस्य प्रतिपद्) एतान्यष्टदिनानि गलग्रहाः कथ्यन्ते। द्वितीया-तृतीया-पञ्चमी-षष्ठी-दशमी-त्रयोदशी-एतास्तिथयः प्रशस्ताः स्युः। मध्ये द्वादशी-एकादशीतिथी प्रशस्ते, यदि चन्द्रमाः स्वोच्चराशौ स्थितः। कृष्णपक्षे चतुर्थी त्यक्त्वा आद्यत्रिभागं (प्रतिपद्, द्वितीया, तृतीयातिथयो व्रते शुभाः स्युः। शुक्र-गुरु-बुधवासरे व्रतबन्धः प्रशस्तः। किन्तु रविवासरे सोमवासरे च व्रतबन्धो मध्यमफलदः स्यात्। हस्तत्रये(हस्त-चित्रा-स्वाती), श्रवणत्रये(श्रवण-धनिष्ठा-शतभिषा), धातृद्वये(रोहिणी-मृगशीर्ष), त्र्युत्तरमैत्रभेषु(उ.फा.-

उ.षाढा-उ.भा.-अनुराधा), पौष्णद्वये(रेवती-अश्विनी), अदितिभद्वये(पुनर्वसु-पुष्य) एतेषु नक्षत्रेषु द्विजानामुपनयनसंस्कार: श्रेष्ठ:। चैत्रशुक्लतृतीया, वैशाखशुक्लतृतीया, माघशुक्लसप्तमी, फाल्गुनकृष्णद्वितीया – एतास्तिथय उपनयनसंस्कारार्थे सर्वथा प्रशस्ता इति भरद्वाजादि श्रेष्ठमुनीनां मतम्।[५८]

दिवसस्य त्रिभागं कृत्वा पूर्वाह्णे दैविककर्म, देवसम्बन्धिकर्म, द्वितीये मानुषं कर्म तथा च तृतीयभागे पैतृकं कर्म श्रेष्ठमिति कथ्यते। ये ग्रहालग्नादिसौम्यग्रहराशियुतास्ते ग्राह्या:, न तु पापराशियुता:। तै: प्रबलैश्च यदि शुभग्रहैर्दृष्टं युतं वा यल्लग्नं तत्प्रबलम्। अत उपनयनसंस्कारे ग्राह्यम्। पापग्रहास्तथा पापग्रहाणां राशयस्त्याज्या:। शेषग्रहाणां सततं दृष्ट: कालस्तेभ्योऽपि गुरुरप्यशक्तस्तेन कारणेन मार्जनेऽसमर्थोऽस्ति। अल्पदोषेनाधिकगुणयुत: काल: सदा शुभकार्येषु शुभद: स्यात्। एवं तत्समयं वीक्ष्य, यन्मङ्गलदिनं चन्द्रताराबलान्वितं तद्दिने शुभकार्यं समाचरेत्। कर्कराश्यांशं परिहृत्य सौम्यग्रहाणां नवांश उपनयनसंस्कार: श्रेष्ठ:। यल्लग्ने क्रूरग्रहाणां नवांशा एवमष्टमांशास्ते मनुष्याणां निन्दिता एव कथिता:। निधनतारां त्यक्त्वा, लग्नतोऽष्टमस्थानशुद्धे, लग्नेऽष्टमेश-अष्टमेशांश-तन्नवांशस्तथा च चन्द्रमसो लग्नेनोत्थितं यल्लग्नं तच्छ्रेष्ठमिति मन्यते। यदि कृष्णपक्षे स्थितश्चन्द्रमा यदि लग्ने स्यात् , तदोपनीतबालो रोगी स्यात्। तथा च यदि चन्द्रमा: शुभग्रहाणां वर्गे स्थितस्तथाप्युपनीतबालो दुष्टो, अतिनिर्धन: श्रुतिकर्महीन:(वेदकर्मरहित:) स्यात्। यल्लग्न इष्टा: पञ्चग्रहास्तथा तद्राशौ, तद्गुहसंज्ञके सूर्य-चन्द्र-गुरु-आदिचत्वारो ग्रहा बलान्वितास्तदोपनयनसंस्कारार्थे लग्नं शुद्धमिति कथ्यते। नीचराशौ स्थिता ग्रहा:, शत्रुगृहे स्थिता ग्रहा:, पराजिता अस्तङ्गता ग्रहा:, यदि लग्ने स्थितास्तदा ते स्वफलं दातुमसमर्था: स्यु:। सूर्य-भौम-शनि-राहु-केतुग्रहास्तथा क्षीणचन्द्रमा: क्रूरसंज्ञकग्रहा: कथ्यते। पूर्णचन्द्रमा

---

५८ व.सं. अ.२९ श्लो. २ त: ३७

गुरुः शुक्रस्तथा बुधः शुभसंज्ञकग्रहाः सर्वकार्येषु शुभा इति कथ्यन्ते। सूर्यो लग्नतः केन्द्रस्थे (१,४,७,१० स्थानेषु) स्थितो दोषकारको भवेत्। तत्र शुक्रग्रहो यदि दोषयुक्तस्तदोपनीतस्य शिशोर्निश्चयेन कालनाशो भवेत्। भौमो लग्नतः केन्द्रे(१,४,७,१० स्थानेषु) स्थितो दोषकारको भवेत्। तत्र यदि शुक्रग्रहो दोषयुक्तस्तदोपनीतस्य शिशोर्निश्चयेन निःसंशयेन वर्षमध्ये मृत्युर्भवति। शनिलग्नादिकेन्द्रे(१,४,७,१० स्थानेषु) स्थितो दोषकारको रुधिरसंज्ञको वा भवेत्। स उपनीतबालस्य, गुरोश्च वा महती पीडां करोति। राहु-र्लग्नादिकेन्द्रे(१,४,७,१० स्थानेषु) स्थितः, दोषकारको रन्धसंज्ञको वा भवेत्। तदोपनीतबालस्य जननी तथा च धनं निःसंशयेन नष्टं भवति। केतुर्यदि लग्नादिकेन्द्रे(१,४,७,१० स्थानेषु) स्थितः, दोषकारक उग्रसंज्ञको वा भवेत्। तदोपनीतबालस्य समग्रं धनव्रतविद्याविनाशनं भवति। चन्द्रमा यदि लग्नतः षष्ठ-अष्टम-द्वादशस्थाने स्थितः, तदोपनीतबालो रोगी धनरहितो निर्धनस्तथा दुःखसञ्चयं करोति। बुधो यदि लग्ने स्थितो गुरुः शुक्रः शाखाधिपो, यदि लग्ने स्थितस्तदोपनीतबालो निश्चयेन व्रतविद्याविशारदः स्यात्। द्वितीयस्थाने स्थिताः शुभग्रहाः सौख्यारोग्यबलप्रदाः स्युः। तत्र यदि पापग्रहाः स्थिताः, निश्चयेन तत्फलनाशदाः स्युः। सुखमारोग्यं बलं च नाशयन्ति।। तृतीयस्थाने स्थिताः शुभ-पापग्रहा व्रतविद्याधनप्रदाः स्युः। चतुर्थस्थाने स्थिताः शुभग्रहा उपनीतबालं सम्पत्ति-भोगप्रदास्तथा धनप्रदाः स्युः। पञ्चमस्थाने स्थिताः शुभग्रहाः नृपद्वारा पूजां धनं सिद्धिं च कुर्वन्ति। षष्ठस्थाने स्थिताः शुभग्रहा दुःखशोकभयप्रदाः स्युः। तत्र यदि क्रूरग्रहाः(सूर्य-भौम-शनि-क्षीणचन्द्रमाः)स्थितस्तेन दुःख-शोक-भयं च नष्टं कुर्वन्ति। सप्तमस्थाने स्थिताः शुभग्रहा व्रतविद्यासुखप्रदाः स्युः। अष्टमस्थाने स्थिताः शुभग्रहा एवं पापग्रहाश्च सर्वे ग्रहा मृत्यु-निर्धनता-शोकप्रदाः स्युः। नवमस्थाने स्थिताः शुभग्रहा धन-आयुःशुभप्रदाः स्युस्तत्र यदि पापग्रहा धन-आयुःशुभं नाशयन्ति। दशमस्थाने स्थिताः

शुभग्रहाः वृत्ति(आजीविका)विद्याधनकारकाः स्युः। एकादशस्थाने स्थिताः शुभग्रहा एवं पापग्रहाश्चाभीष्टफलं प्रददति। द्वादशस्थाने स्थिताः शुभग्रहा एवं पापग्रहा व्ययं कुर्वन्ति। दुष्टनीचग्रहा जनं पापरतं, बुद्धिहीनं तथा विदेशगमनपरं कुर्वन्ति। व्ययस्थाने स्थितः सूर्यो, भौमेन दृष्टस्तदाचार्यो नेत्रहीनो भवति। बली ग्रहो बलवान् स्यात्, तदा निश्चयेन तत्फलं शीघ्रं प्राप्नोति। एकोऽपि दोषो गुणान् हन्ति, यदि तद्विरोधी गुणे न चेत्, यथा पञ्चगव्ययुतपूर्णकुम्भे मेघलवः। सर्वगुणोपेतं लग्नं यद्येकेन दोषेण दूषितं तत् त्यजेत्, यथाङ्गुलमिवाहिना सर्पेण दूषितम्। एकोऽपि दोषो लग्ने स्थितः, सकलगुणयुतशुभग्रहाणां फलं हन्ति। यथा एकमप्यसत्यं सकलपुण्यं नष्टं करोति। एकोऽपि दोषो पञ्चाङ्गलग्नलग्नांशशुभग्रहकृतान्गुणान् हन्ति। यथा स्वच्छन्दचारिणी स्त्री स्वजनो नित्यं हन्ति। स्वकुलं नष्टं करोति। सिद्धामृतयोगाः पञ्चाङ्गलग्नोत्पन्नानां, शुभग्रहोत्थसकलगुणानां, सम्पूर्णसमूहानामेकोऽपि दोषो निहन्ति, यथा वृकोऽजान् नाशयति। शुभग्रहोत्पन्नान्, लग्नोत्पन्नान्, पञ्चाङ्गोत्पन्नान् अमृतयोगोत्पन्नान् सकलगुणानेकोऽपि दोषो नाशयति, यथा कूटसाक्षी सुपुण्यराशीनिव सुतरां निहन्ति । एकोऽपि कूटदोषः सम्पूर्णगुणान् नाशयति, यथा शरीरस्थो क्षयरोगो द्राक् सप्तधातून्। सर्वानिमानतिबलः स्फुरितकिरणसमूहयुतः सुरराजमन्त्री(गुरुः) यदि लग्ने स्थितस्तदैको बहूनि दुरितानि समस्तदोषाणां शमनं करोति। भगवान् शंकरस्य भक्तिपूर्वकं प्रणामेनातिदारुणं पापं नष्टं भवति। एकोऽपि शुभग्रहः केन्द्रे(१,४,७,१० स्थाने) स्थितः, सकलं दोषसञ्चयं नष्टं करोति, यथा सूर्योदयेनान्धकारो नष्टो भवति। यदि शुभग्रहः स्वोच्चैः स्थितो लग्नं पश्येत्, तदा सकलदोषा लयं प्राप्ता यथा ग्रीष्मे कुसरितः। यदि लग्ने स्वमित्रगृहे स्थितग्रहो शुभग्रहेण दृष्टस्तदा लग्नलग्नांशसम्भूता दोषा लयं यान्ति। यदि लग्ने शुभग्रहयुतो दुष्टग्रहः स्वोच्चे/स्वोच्चांशे स्थितस्तदा लग्नलग्नांशसम्भूता दोषा लयं यान्ति। सर्वदोषाणां शमनं भवति। एकोऽपि शुभग्रहः स्वाधिमित्रगृहे संस्थितो लग्नं पश्येत्, सर्वदोषविनाशकृत् स्यात्।

मित्राधिमित्रस्वक्षेत्रसंस्थितग्रहः शुभग्रहेण दृष्टो लग्नं पश्येत्, तदा सर्वदोषा नष्टा भवन्ति। केन्द्रे स्थितो(१,४,७,१० स्थाने)गुरुः पापग्रहाणां प्रभवदोषान्, लग्नलग्नांशोत्पन्नदोषान् नाशयति, यथाम्भः कतकद्रुमस्य फलं विमलीकरोति।[५९]

## १.४.७ समावर्तनम् —-

वृद्धवसिष्ठसंहिताग्रन्थे त्रिंशत्यध्याये समावर्तनविषयास्त्रयः(३) श्लोकाः सन्ति। पाणिपीडनात् (विवाहपूर्वं) प्राक्-पश्चाद् गोदानतः वेदांश्चाधीत्य, तदर्थशास्त्राण्यभ्यस्य, स्वगुरोरनुज्ञां प्राप्य समावर्तनं कुर्यात्। उत्तरायणे-गुरुशुक्रयोदये, शुक्लपक्षे, रिक्तातिथिं(४,९,१४), क्षयतिथिम्, अष्टमीतिथिं तथा वैनाशिकाख्याखिल-ऋक्षवृन्दं सन्त्यज्य समावर्तनं कुर्यात्। करादिपञ्चसु (हस्त-चित्रा-स्वाती-विशाखा-अनुराधा)नक्षत्रेषु, अदितिद्वये(पुनर्वसु-पुष्ययोः), अश्विनी, विष्णुत्रये(श्रवण-धनिष्ठा-शतभिषा), त्र्युत्तरधातृ(उ.फा-उ.षाढा-उ.भा.-रोहिणी), तथा च सपौष्णे(रेवतौ)- एतेषु नक्षत्रेषु चन्द्रमसौ स्थिते, शुभग्रहाणां राशिषु(वृष-मिथुन-कन्या-तुला-धनु-मीन-कर्क)यदि चन्द्रमा बली तदा, शुभग्रहाणां वासरेषु(सोम-बुध-गुरु-शुक्र) यत्स्नातककर्म क्रियते, तच्छ्रेष्ठं भवति।[६०]

## १.४.८ विवाहप्रश्नाः —

वृद्धवसिष्ठसंहिताग्रन्थ एकत्रिंशत्यध्याये विवाहप्रश्नविषयका अष्ट (८) श्लोकाः सन्ति।

---

५९ व.सं. अ.२९ श्लो. ३८ तः ७९

६० व.सं. अ.३० श्लो. १ तः ३

शुभे दिने ताम्बूलपुष्पाक्षतपूर्णपाणिः कर्ता च गत्वा दैवज्ञं प्रणिपत्य तस्मै वरकन्ययोश्च विषये पृच्छ्येत्। प्रश्नकालिकलग्न एकोऽपि पापग्रहो लग्ने स्थितस्तथा चान्ये पापग्रहाः सप्तमस्थाने स्थिताः, तदा सप्तमाब्दे वरस्य निधनं भवति। यदि ते पापग्रहा बलान्वितास्तदावश्यं तत्फलं प्राप्नोति। प्रश्नकालिकलग्ने यदि चन्द्रमाः स्थितः, तस्माद् भौमः सप्तमराशौ संस्थितः(लग्नतः सप्तमस्थाने भौमः संस्थितः), तदाष्टमाब्दे वरस्य वाङ्गनाया वावश्यं मृत्युं करोति। प्रश्नकालिकलग्नं यदि स्वनीचराशौ संस्थितम्, शत्रुग्रहेण दृष्टं, पापग्रहो यदि लग्नतः सप्तमस्थाने स्थितः, तदा सा विवाहिता स्त्रीर्मृतपुत्रिणी, वन्ध्या, भर्तृविवर्जिता वा स्यात्। लग्नतस्त्रि-पञ्च-अस्त-दश-आय(३-५-७-१०-११)स्थाने स्थितश्चन्द्रमाः, यदि गुरुणा दृष्टः, तदा तयोः (वरकन्ययोः) सम्बन्धस्तत्समये स्थापितः, किन्तु सूर्येण सहास्तङ्गतः, नीचराशौ संस्थितः, तदा न भवति। वृषभ-कुम्भ-कर्कराशिर्लग्ने स्थिता, तथा चन्द्रमाः शुक्रेण युतो दृष्टो वा तदा पृच्छकस्य कन्यकाया लाभो भवेत्। शुक्रस्तथा चन्द्रमा अन्योन्यराश्यंशगतौ, निरीक्षितौ वा, तौ बलिनौ लग्नं पश्येतां, तदा तत्समये तयोः(वरकन्ययोः) सम्बन्धोऽवश्यं कुरुते। तथा च सः सम्बन्ध आजीवितं सुखप्रदानं करोति। अयुग्मराश्यंशगते(विषमराशौ, विषमांशे वा लग्ने स्थितः) पुरुषग्रहै(सूर्यभौम गुरुभिः)र्दृष्टः, अथवा द्रेष्काणे पुरुषग्रहाः स्थितास्तदा तथाविधे खलु कन्यकायास्तस्य वरस्य लाभं वदेत्।[६१]

## १.४.९ विवाहः --

वृद्धवसिष्ठसंहिताग्रन्थे द्वात्रिंशत्यध्याये विवाहसंस्कारविषयका द्विशताधिक चतुश्चत्वारिंशत्(२४४) श्लोकाः संम्मिलिताः सन्ति।

---

६१ व.सं. अ.३१ श्लो. १ तः ८

कश्चिद् गृहाश्रमान् न परोऽस्ति धर्मः। ब्रह्मचर्याश्रमः-गृहस्थाश्रमः-वानप्रस्थाश्रमः-संन्यसाश्रमश्चेति चत्वार आश्रमाः सन्ति। एतेषां चतुर्णाणामाश्रमाणां मध्ये गृहस्थाश्रमः श्रेष्ठः। सोऽपि सुन्दरगुणयुत-सदाचरणयुत-गृहिणीवशो विद्यते। अतो लग्नवशतो गुणवृत्तिलब्धिर्विवाहानुसारेण प्राप्ता भवति। अतस्तथाविधं सुयोग्यं लग्नं प्रतिपाद्यते।[६२]

स्वजन्मवर्षाद् युग्मेष्वब्देषु कन्यकानां विवाहः शुभदः स्यात्। स्वजन्मवर्षाद् अयुग्मेष्वब्देषु नराणां विवाहः शुभदः स्यात्। (कन्यकानां जन्मतः समवर्षेषु तथा च नराणां विषमवर्षेषु विवाहं कारयेत्, शुभफलदायी स्यात्। विपरीतेन दुःखगदप्रदः स्यात्।) कन्यकानां विषमवर्षेषु तथा च नराणां समवर्षेषु विवाहं कारयेत्, दुःखं रोग इति फलं भवति।[६३]

दिनाधिपे(सूर्ये) मेष-वृषभ-वृश्चिक-कुम्भ-मिथुन-मकरराशौ स्थिते, माघद्वये (माघमासे फाल्गुनमासे वा) विवाहः कार्यः। विवाहे शुक्लपक्षस्य द्वितीयातिथिमारभ्य कृष्णपक्षस्य दशमतिथिपर्यन्तं शुभाः कथिताः। तत्राष्टमीं षष्ठीं चतुर्थीं नवमीमेवं चतुर्दशीतिथिं त्यक्त्वान्यास्तिथयः शुभाः स्युः। शुक्लपक्षे दिने दिने वृद्धिंगतश्चन्द्रमाः शुभः। तथैव कृष्णपक्षे दिने दिने विलयं गतत्वात्, पक्षान्ते निश्चयेन पापग्रहो भवेत्। विवाहे शुभग्रहाणां वाराः (सोम-बुध-गुरु-शुक्रवाराः) प्रशस्ताः। रविवार-शनिवारौ मध्यमौ तौ कथितौ। तथा च भूमिसुतस्य वारः(मङ्गलवारः) सदा विवाहे त्याज्यः। तिस्रोत्तरा (उत्तराफाल्गुनी-उत्तराषाढा-उत्तराभाद्रपदा)नक्षत्राणि, मूल-मघा-रेवती-अनुराधा-रोहिणी-मृगशीर्ष-हस्त-स्वाती-एतानि नक्षत्राणि वेधविवर्जितानि स्युः, तदा कन्यकायाः पाणिग्रहणं सदा श्रेष्ठं कथ्यते। पञ्चरेखा उर्ध्वं पञ्चरेखा तिर्यक्, द्वे द्वे कोणे चक्रे निर्माय, ईशानकोणस्य द्वितीयरेखायां कृत्तिकानक्षत्रं स्थापयित्वा, प्रदक्षिणक्रमेणाभिजिन्नक्षत्रसहितानि सर्वाणि नक्षत्राणि स्थापयित्वा

---

६२ व.सं. अ.३२ श्लो. १

६३ व.सं. अ.३२ श्लो. २

पञ्च शलाकाचक्रनिर्माणं कार्यम्। तस्मिन् चक्रे एकरेखास्थितं नक्षत्रं ग्रहणे प्रदिष्टम्। क्रूरग्रहैर्विद्धं तदा सम्पूर्णं नक्षत्रं वर्जयेत्। सौम्यग्रहाणां विद्धनक्षत्रस्य केवलपाद एव-अन्तिमचरणस्त्याज्यः, न तु सम्पूर्णनक्षत्रम्। आर्द्रानक्षत्रस्योदयपश्चाद् दशके नक्षत्रवृन्दे (आर्द्रातः स्वातीनक्षत्रपर्यन्तं) यत्समये सूर्यस्यागमनकाले तथा च मीनस्य सूर्यगतकाले तथा च पूर्वकथितमासेषु विवाहादि- मङ्गलकार्याणि न शुभावहानि। आर्द्रातः स्वातीनक्षत्रपर्यन्तं दशके नक्षत्रवृन्दे विवाह-चौल-व्रतबन्धनदेवप्रतिष्ठादिकार्याणि न कार्याणि।[६४]

यदि शुक्रोदयः पूर्वदिशि स्यात्, तदा त्रिदिनपर्यन्तं बालत्वदोषस्तथा दशदिनपर्यन्तं वृद्धत्वदोषः स्यात्। यदि शुक्रोदयः पश्चिमदिशि स्यात्, तदा दशदिनपर्यन्तं बालत्वदोषस्तथा पञ्चदिनपर्यन्तं वृद्धत्वदोषः स्यात्। किन्त्वाचार्याणां मतेनोभयदोषौ पक्ष-पक्ष(१५-१५)दिनस्य कथितौ। चन्द्रस्य त्रिदिनं वृद्धत्वं, दिनार्धबालत्वं तथा दिनद्वयपर्यन्तमस्तकालः स्यात्। चन्द्रस्यास्तकाले कन्यकाया विवाहे कृते, सा कन्या मृत्युमुपैति। बालत्वकालेऽन्यसक्तः(परपुरुषेण सह प्रेम) तथा वृद्धे वैधव्यं प्राप्नोति। स्वजन्ममासो, जन्मनक्षत्रमेवं तिथिक्षयेषु तथा च वैनाशिकादिद्वयनक्षत्रेष्वात्माभ्युदयाभिलाषी (स्वोन्नतिमभिलषन्) विवाहं न कुर्यात्। तथा च त्रितयज्येष्ठं (ज्येष्ठअपत्यं-ज्येष्ठमासः-ज्येष्ठनक्षत्रं) त्याज्यम्। ज्येष्ठमासे यदि नृनार्योरुभयोः स्वमातृपित्र्योर्ज्येष्ठसन्तानः, तदा विवाहकार्यं न प्रशस्तम्। अद्भुतेषु सर्वग्रासग्रहणे सप्तरात्रं, खण्डग्रासग्रहणे तदर्धं -$3^{1}/_{2}$रात्रौ तथा च अद्भुतोत्पाते सप्तरात्रं विवाहो वर्ज्यः। सूर्यचन्द्रयोर्ग्रस्तोदयग्रहण आदावर्धोऽनिष्टः कथितः, किन्तु ग्रस्तास्तग्रहणे मासषट्कपर्यन्तं दोषाः स्युः। तिथि-नक्षत्र-योगादिसन्धिः, तदा चतुर्घटी तथा च करणस्य सन्धिर्द्विपाददोषः(२ चरणपर्यन्तं दोषः) स्यात्। पक्षमाससन्धौ त्रिदिनं, उभयसन्ध्ययोश्च त्रिघटी, वैधृतियोगे, विष्टिकरणे, अष्टमभावगतचन्द्रमसि तथा

---

६४ व.सं. अ.३२ श्लो. ३ तः ११

परिघार्धमाद्यम्- एते सर्वे पापयोगाः कथिताः। पूर्वोक्तकथिताष्टदोषाः, निसर्गदोषानां त्रिघटी सर्वमङ्गलकार्येषु वर्जयेत्। निमित्तसंयोगनिसर्गजानां मध्ये महादोषचयमुक्तम्। पञ्चाङ्गदोषः, सूर्यसंक्रमणदिनं, ससंग्रहः, कर्तरिकांशदोषः, षष्ठ-अष्टम-द्वादशस्थाने वा स्थितश्चन्द्रमाः, पापवर्गे स्थितश्चन्द्रमाः, अष्टमस्थाने स्थितो भौमः, षष्ठस्थाने स्थितः शुक्रः, गडान्तदोषः, खार्जूरिकदोषः, वारदोषः, विषनाडीदोषः, अष्टमलग्नमेषराशिदोषः- एते सर्वे दोषा महादोषानां समूहाः कथ्यन्ते। तस्मिन्महादोषचयेऽपि कृतं कार्यमवश्यं नाशमुपैति। अकालवृष्टिः, कुमुहूर्तदोषः, महाव्यतीपातयोगोत्पन्नदोषः, वैधृतिदोषः, लग्नास्तजातो दोषः ग्रहणनक्षत्रोत्पन्नदोषः पापग्रहेण विद्धनक्षत्रसमुद्भवा दोषाः, उत्पातदोषः, नक्षत्रदोषः, उल्कामहोत्पातादिः,सर्वदेशेषु त्याज्यदोषाः- एत एकविंशतिदोषाः स्वसंहितायां पितामहेनोक्ताः।[६५]

उपग्रहदोषः, लत्तादोषः, भयम्, अतिनक्षत्रम्, उपग्रहेण विद्धमेवं दूषितं, विरुद्धयोगेषु, विरुद्धनाड्योर्घ्रुराशयश्च तथा ग्रहजन्मनक्षत्रं, मासदग्धतिथिः, लग्नत अन्धानि, शून्यानि, बाधिराणि, द्युदग्धलग्नानि, सपङ्क-काण-ज्वालामुखी-बन्धन-मासादितिथयः, प्रत्यर्क-नीहार-महेन्द्रचाप, विद्युत् - भूभ्रमण - अभ्रदोष - मरुत्प्रचलन - परिवेष - कम्प - प्रतीन्दु- वैवर्ण-सूर्यचन्द्रमसोर्दोषाः, द्युवारदोषः, वारोत्पन्नदोषः, मृत्युघात-हलाहलोत्थदोषः, महानलदोषः- एते दोषाः- देशव्यवस्थानुसारेण सुसम्यक् क्रियन्ते। उपग्रहनक्षत्रदोषा कुरुबाह्लिकेषु, कलिङ्ग-वङ्गदेशेषु पातदोषः, सौराष्ट्रशाल्वेषु लत्तानक्षत्रदोषः, तथा सम्पूर्णदेशेषु शुभाशुभग्रहाणां दोषा विजानीयात्। नक्षत्रराश्योत्पन्न- निषिद्धयोगः, जन्मनक्षत्रोत्पन्ननिषिद्धनाडीदोषः, तथा च निशासु वारप्रभवादिदोषाः, कौङ्कणसंज्ञदेशे सदा त्याज्याः। मासदग्धादिदशका दोषाः खलु मध्यदेशे वर्जयेत्। दुःखप्रदा दुर्दर्शनदुर्निमित्त-

६५ व.सं. अ.३२ श्लो. १२ तः २४

दु:शकुनादिका यत्र तत्र विवर्जयेत्। प्रत्यर्कपूर्वा दशपूर्वा दोषा सदैव मगध एवं गौडदेशे त्याज्या:। तिथिवारजाता एवं नक्षत्रवारप्रभवाश्च दोषा नानाभिधानदोषा स्यु:। एता दोषा हूण-अङ्ग-वङ्ग-खसदेशेषु वर्ज्या:। शेषेष्वन्यदेशेषु न ते निषिद्धा:। अतस्तेषु देशेषु विवर्जिता:। अन्यदेशेषु न दोषदा: स्यु:। अथ एता दोषा देश-कालव्यवस्थानुसारेण, पूर्वशास्त्रानुसारेण सम्यक् कृत्वा पुनर्महादोषनिरूपणं क्रियते। क्रमेण तिथि-वार-नक्षत्र-योग-करणाणि(तिथ्यर्धसंज्ञक) पञ्चाङ्गसंज्ञकम्। तत् पञ्चाङ्गं सूर्यचन्द्रयोत्पन्नमिति प्रोक्तम्। पञ्चागोत्पन्नदोषो निखिलमङ्गलसञ्चयं तस्मिन्कृतं दहति, यथा विस्तृतवनानां दावाग्निर्दहनं करोति।[६६] विषुवे तथायने त्रिदिनं तथा च षडशीतिमुखेषु-विष्णुपदीसंक्रान्तिदिने पूर्वतोऽपि, परतोऽपि षोडश षोडशघटय:(नाडिकाश्च) संक्रमणकाल: स्यात्। संक्रान्तिदोषे कृतं विवाहादि- समस्तमङ्गलं नष्टं भवति। यद्वदशेषकोटिलाक्षासमूहं ज्वलिताग्निमध्ये विलीयते। यदा यत्र सूर्यस्य तद्राशिप्रवेश: स्यात्, तदा संक्रमणकालो ज्ञेय:। तत्र पूर्व-परत: षोडश षोडश नाड्य: त्याज्या:।[६७]

यदा चन्द्रमा: सूर्यभौमयोर्युत:, तदा संग्रहनामको हलाहलविषसमानमहादोष: स्यात्। पापग्रहोत्पन्न: संग्रहनामकदोषो लग्नोत्पन्नदोषान् निहन्ति, यद्वदनेकोन्मत्तगजानेकोऽपि प्रबलश्च सिंहो निहन्ति। यदि चन्द्रमा: सूर्येण युतस्तदा दारिद्र्यं, भौमेन युतस्तदा मृत्यु:, बुधकारणेन सन्तानहीन:, गुरुणा दौर्भाग्य:, सितेन ससापत्न्यकं तथार्कसुतेन प्रवज्यायोगो भवेत्। केषांचित् जनानां मतेन चन्द्रमा बुधेन गुरुणा वा युत: शुभो मन्यते। यदि चन्द्रमा: पापग्रहैर्युत:, तदा व्याधिर्मृत्युर्वा भवेत्। यदि चन्द्रमा: शुभग्रहैर्युत:, तदा दीर्घप्रवासदायी स्यात्। विवाहलग्ने पृष्ठाग्रयो:-लग्नतो द्वितीयद्वादशस्थानयो:- ऋजुवक्रगति-मार्गी-वक्रीत्वग्रहकारणेन

---

६६ व.सं. अ.३२ श्लो. २५ त: ३६

६७ व.सं. अ.३२ श्लो. ३७ त: ३९

कर्तरीदोषः स्यात्। किन्तु यदि स वक्री ग्रहः शीघ्रगामी, तदा कर्तरीदोषो न स्यादिति पितामहेनोक्तम्। यो लग्नोद्भवानेकशुभग्रहोत्थाखिलगुणान् कर्तरीनामा महादोषो हन्ति। यथा एकोऽपि प्रबलव्याघ्रः समस्तगजानां संहतिं निहन्ति। विवाहलग्ने यदि लग्ने चन्द्रमा वा क्रूरग्रहमध्यगतस्तदा कन्याया इच्छितवरस्य मृत्युर्भवेत्। नीचे शत्रुगृहे स्थितः पापग्रहोत्थकर्तरीकारणेन कर्ता नष्टो भवति। किन्तु यदि ग्रहाः सूर्येण सहास्तङ्गताः कर्तरीयोगो नैव दोषदो भवेत्। लग्नादिसर्वा राशयः शुभग्रहैर्युता दृष्टा वा शुभाः स्युः, तत्र तुलामिथुनपूर्वार्धधनुराशौ नवांशे विवाहः शुभो भवति, न चान्यथा। विवाहलग्ने, यदि लग्नं मेषनवांशे स्थितं तदा कन्या द्विभर्तृका स्यात्। विवाहलग्ने यदि लग्नं वृषभनवांशे स्थितं तदा कन्या पशुशीलयुक्ता स्यात्। विवाहलग्ने यदि लग्नं मिथुननवांशे स्थितं तदा कन्या धनान्विता तथा पुत्रवती स्यात्। विवाहलग्ने यदि लग्नं कर्कनवांशे स्थितं, तदा कन्या निरन्तरकुलटा स्यात्। विवाहलग्ने यदि लग्नं सिंहनवांशे स्थितं, तदा कन्या पितृगृहे निवासं करोति। विवाहलग्ने यदि लग्नं कन्यानवांशे स्थितं तदा कन्या धनिनी तथा सुशीला स्यात्। विवाहलग्ने यदि लग्नं तुलानवांशे स्थितं, तदा कन्या सर्वगुणयुक्ता स्यात्। विवाहलग्ने यदि लग्नं वृश्चिकनवांशे स्थितं, तदा कन्या निर्धना एवं शीलरहिता स्यात्। विवाहलग्ने यदि लग्नं पूर्वार्धधनुनवांशे स्थितं, तदा सा कन्या धनवती स्यात्। विवाहलग्ने यदि लग्नमुत्तरार्धधनुनवांशे स्थितं, तदा सा कन्या परासक्ता मलिना तथा रोगिणी स्यात्। विवाहलग्ने यदि लग्नं मकरनवांशे स्थितं, तदा सा कन्या निर्धना गुणरहिता च स्यात्। विवाहलग्ने, यदि लग्नं कुम्भनवांशे स्थितं, तदा सा कन्या विभर्तृका (पतिरहिता), योगरता, जरारहिता च स्यात्। विवाहलग्ने यदि लग्नं मीननवांशे स्थितं शुभग्रहैर्युतं दृष्टं वा तदा सा पतिपुत्रधनहीना स्यात्। अत उक्त लग्ननवांशे गुणसम्प्रवृद्धये कन्याया विवाहं कुर्यात्। विवाहकाललग्नेऽन्तिमनवांशो द्विस्वभावराशौ नवांशमध्यगतः, तदा विवाहो न शुभप्रदः। स

एव वर्गोत्तमसंज्ञितश्चेत्, अखिलमङ्गलेषु शुभप्रदः स्यात्। विना वर्गोत्तमनवांशा अन्तिमनवांशास्त्याज्याः। तथा यद्यन्तिमनवांशो वर्गोत्तमी चेत्, पुत्रपौत्राभिवृद्धिदः स्यात्। नवांशदोषः सकलगुणोत्पन्नं लग्नं तथा शुभग्रहोत्पन्नान् सौम्यग्रहसम्भवान् च षडवर्गोत्पन्नान् सौम्यग्रहाणां गुणान् हन्ति, यथा वृकोऽजसंघान् निहन्ति। षष्ठ-अष्टम-द्वादशस्थाने वा स्थितश्चन्द्रमा दोषकारकः स्यात्। स विविधगुणानां तथा लग्नांशानामेवं सौम्यग्रहोत्पन्नगुणानां नाशनं करोति। यथा सुरालवः(मदिराबिन्दुः) पावनपञ्चगव्येषु स्थितः। षष्ठ-अष्टम-द्वादशस्थाने वा स्थितश्चन्द्रमा यदि त्रि-उच्चस्थाने स्थितः, तदा विवाहोत्पन्नदोषकारको न स्याद्, यद्वद्वत्सलकार्ये गौः स्ववत्सं वात्सल्यं करोति। पापषड्वर्गे स्थिता ग्रहा महादोषकारकाः स्युः। एते पञ्चग्रहोत्पन्नान् शुभग्रहोत्पान् तथा लग्नोत्पन्नगुणान् नाशयन्ति, यथा राघवस्यामोघबाणः समुद्रं शुष्येत्। पापषड्वर्गोत्पन्नदोषाः सकलगुणसञ्चयान् नाशयति। यथा भगवतः कृष्णस्य द्व्यक्षरं हरिरिति सम्पूर्णपापसमूहान् नाशयति। लग्ने स्थितो लग्नतोऽष्टमस्थाने स्थितो वा भौमस्थितदोषः सकलगुणान् नाशयति, यथानृतं धर्मसमुदायान् नाशयति। तत्र वधूवरौ च कथं विमुक्तौ? लग्नात्कुजाष्टमो दोषो निखिलगुणान् नाशयति, यथा पापः धर्मसमूहान् नाशयति। तनूजातान् भौमाष्टदोषो गूढं हन्ति। सः दम्पत्योर्मरणं पराङ्गनायोगं वा करोति। लग्नस्थ एवं भृगुषट्कदोषो(षष्ठस्थाने स्थितः शुक्रः)विविधान् गुणान् नाशयति। यद्वद्व्याधिः क्रमाद् धातून् नाशयति। एवं मित्राधिमित्रग्रहाणोत्पन्नो दोषोऽखिलगुणान् नाशयति। षष्ठस्थाने स्थितः शुक्रदोषो निश्चयेन वधूवरयोर्वियोगं कुर्वन्ति। सा विवाहिता कन्या शीघ्रं भर्तृघ्नी वाचिराद् भवति। तस्या विवाहितायाः कन्यायाः पतेर्मृत्युर्भवेत्। मघा-आश्लेषानक्षत्रयोः, मूल-ज्येष्ठानक्षत्रयोः, तथा च अश्विनी-रेवतीनक्षत्रयोर्यदन्तरालं नक्षत्रं तद्गण्डान्तसंज्ञकं स्यात्। तद्नाडीद्वयप्रमाणं सम्पूर्णशुभकार्यान् नाशयति। आश्लेषा-धनिष्ठा-रेवतीनक्षत्राणामन्तभागो यामार्धं तथा नक्षत्रसन्धिः स्यात्। मघा-

मूल-अश्विनीनक्षत्राणामादिभागो यामार्धं तथा ऋक्षगण्डान्तसंज्ञकः स्यात्। पञ्चमषष्ठतिथ्योर्यदन्तरालं पुनः पुनः प्रहरार्धकालः कथितः। यः लग्नोत्पन्नाखिलगुणसमूहान् नाशयति। यथा क्ष्वेडं निश्चयेन नरान् हन्ति। कर्कसिंहयोः, धनुवृश्चिकयोः, मीनमेषयोर्लग्नान्तरालं घटिकार्धं सर्वगुणान् हन्ति। यथा लोभो नरस्य सर्वगुणान् हन्ति। खर्जूरचक्रस्य समाङ्घ्रिदोषो लग्नोत्पन्नान् सम्पूर्णगुणान् तथा च शुभग्रहोत्पन्नान् सर्वगुणान् हन्ति। यथा दारिद्र्यमेकमखिलान् गुणान् हन्ति। पादेन पादं विनिहन्ति, चरणद्वारा चरणदोषो नष्टो भवति। तस्य राशेर्विनाशो नवांशकेन स्यात्। ग्रहोऽपि पादेन सम्पूर्णदोषं तथा च नवांशकेन सम्पूर्णनक्षत्रदोषं नष्टं न करोति। सर्वराशेरुदयो, विलग्नं वेधो न कदापि नक्षत्राणां सर्वगुणान् नाशयन्ति। इष्टनवांशद्वारा लग्नोत्पन्ननक्षत्राणां विरुद्धचरणा प्रशस्ता। पादेन दूष्यं सकलनक्षत्रं, नक्षत्रेण दूष्यं सकलभगणं तथा च गणदोषात् सम्पूर्णदोषः स्यात्। अत अतिप्रसङ्गेन स्थितः पाददोष एवं मन्यते। यथा विषप्रदग्धेन हतस्य पत्रिणो मृगस्य क्षतादृते मांसं शुभदं स्यात्। तथैव ग्रहविद्धनक्षत्राणां दूषितचरण एवाशुभः स्यात्। अवशिष्टाः पादाः शुभाश्चेति पितामहेनोक्तम्। अत अन्त्य-आदिपाद-द्वितीय-तृतीयपाद-गताः चरणा न शुभाः स्युः। वेधकृतग्रहाः न चान्यपादमादरात् भिनत्ति। एतेभ्यश्चरणाद् दृश्यचन्द्रमसः सम्बन्धकारणेनात्र निश्चयेन समत्वं ज्ञेयम्। शुभग्रहैर्विद्धपाद(चरण) एव न शुभ इत्यखिलशास्त्रमतम्। पापग्रहेण विद्ध एवं पापग्रहैर्युतः। पूर्णनक्षत्रं(४ पादयुतनक्षत्रं) एवं पादतो नक्षत्रं माङ्गलिककार्यार्थे न शोभनम्। खार्जूरयमघण्टककुलिकवारोत्पन्नदोषः, लग्नदोषः, अंशदोषः सकलशुभगुणान् नाशयति, यथा शरीरमखिलं त्रयो दोषा सत्त्व-रजस्-तमसो नाशयन्ति। अन्योन्यान्महान् गुणसञ्चयानपि यामार्धतुल्याः पृथक् स्युः। प्रहरार्धे निधनं नाम मृत्युः, यमघण्टे धनहीनत्वं, तथा च कुलिके सर्वनाशः स्यात्। किन्तु रात्रौ समये एता

दोषा न स्युः।[६८]

अश्विन्यादिनक्षत्रक्रमेणाश्विनीनक्षत्रस्य ६० घटयः, भरणीनक्षत्रस्य २४ घटयः, कृत्तिकानक्षत्रस्य ३० घटयः, रोहिणीनक्षत्रस्य ४० घटयः, मृगशीर्षनक्षत्रस्य १४ घटयः,आर्द्रानक्षत्रस्य २१ घटयः, पुनर्वसुनक्षत्रस्य ३० घटयः, पुष्यनक्षत्रस्य २० घटयः, आश्लेषानक्षत्रस्य ३२ घटयः, मघानक्षत्रस्य ३० घटयः, पूर्वाफाल्गुनीनक्षत्रस्य २० घटयः, उत्तराफाल्गुनीनक्षत्रस्य १८ घटयः,हस्तनक्षत्रस्य २१ घटयः, चित्रानक्षत्रस्य २० घटयः, स्वातीनक्षत्रस्य १४ घटयः, विशाखानक्षत्रस्य १४ घटयः, अनुराधानक्षत्रस्य १० घटयः, ज्येष्ठानक्षत्रस्य १४ घटयः, मूलनक्षत्रस्य ५६ घटयः, पूर्वाषाढानक्षत्रस्य २४ घटयः, उत्तराषाढानक्षत्रस्य २० घटयः, अभिजिन्नक्षत्रस्य १० घटयः, श्रवणनक्षत्रस्य १० घटयः, धनिष्ठानक्षत्रस्य १८ घटयः, शतभिषानक्षत्रस्य १६ घटयः, पूर्वाभाद्रपदानक्षत्रस्य १४ घटयः, उत्तराभाद्रपदनक्षत्रस्य ३० घटयः –एतेभ्यो नक्षत्रेभ्यः परस्तघटिका विषनाडिकाख्याः प्रोक्ताः। अतश्चतस्रो नाड्यः सर्वेषु शुभकार्येषु त्याज्याः। विषाख्यनाडीषु कृतं शुभकर्म शीघ्रं विनश्यति। एता विषनाडिका लग्नाश्रितानांशगणान् विशेषान् नाशयन्ति। यथा कुष्ठ–भगन्दर–अर्श–व्याघात–शूल–क्षय–वातरोगाः प्राणिनो नाशयन्ति। एता विषनाडिका विवाहितकन्यायै वत्सरत्रयाद् वैधव्यं प्राप्नुवन्ति। तथा चान्यमङ्गलकार्येषु मृत्युः, धनहीनत्वं वेति फलं प्रददति।[६९]

यस्यास्तु लग्ने लग्नेशः स्थितः वा राशौ, राश्यधिपतिः स्थितः, अथवा राश्यधिपतिर्लग्ने स्थितः, स मृत्युमाप्नोति, यथा शङ्करस्य/शिवस्य मस्तकात् तृतीयनेत्राग्निकारणेन कामदेवो दग्धो भवति। जन्मलग्नतो जन्मराशितो वा द्वादशलग्नं स्त्रीणां

---

६८ व.सं. अ.३२ श्लो. ४० तः ७७

६९ व.सं. अ.३२ श्लो. ७८ तः ८२

धनं हरति। तथा चाष्टमलग्नं मृत्युं प्रतिपादयति। लग्नतो नक्षत्रतो (चन्द्रराशितो) वा यद्यष्टमस्थाने तस्य स्वामी स्थितः, तदा तद्योगे कृतो विवाहो मृत्युकारी । तदा भयमाप्नोति यद्विधातापि रक्षितुमसमर्थोऽस्ति। वरकन्ययोरुभयोर्लग्नतोऽष्टमनक्षत्रं, तस्य नवांशस्य एवं तस्य स्वामिनो दोषस्त्याज्यः। तस्मात् स्वजन्मनक्षत्रनवांशं सदैवाष्टमस्थाने गतं वर्जयेत्। जन्मलग्नेशस्तथाष्टमेशो यदि परस्परमित्रराशौ स्थितस्तदा जन्मराशितोऽष्टमनक्षत्रोत्पन्नं दोषं स्वभावतो नाशयति।[७०]

अकालवृष्टिप्रभवदोषः शुभकार्यकर्तुर्मृत्युं करोति, यथा सर्वगुणयुक्तमनुजो विषवह्निदग्धं बन्धुवर्गं रक्षितुमसमर्थोऽस्ति। अकालवृष्टिप्रभवदोषो वरकन्ययोश्च मृत्युं करोति। यथा सीतावियोगप्रभवेन सुदीर्घेण रामस्य कोपेन रावणस्य नाशो भवति। कुमुहूर्तदोषो विवाहितकुमारं शीघ्रं निःस्वं करोति। यथा सप्ताङ्गराज्योद्धतराजरत्नं नलराजा द्यूतकारणेन निर्धनोऽभवत्। संवत्सरार्धात्कुमुहूर्तदोषो वरस्य सम्पूर्णलक्ष्मीं निहन्ति। यथा दुर्वासस: शापकारणेन प्रमत्तेन्द्रस्य समग्रा लक्ष्मीर्नष्टा भवति। रविवासरे अर्यमा, सोमवासरे राक्षसब्रह्मसंज्ञो भौमवासरे पितर एवं अग्निः, बुधवासरेऽभिजित्, गुरुवासरे तोयस्तथा राक्षसाख्यः, शुक्रवासरे ब्राह्ममैत्रस्तथा शनिवासरे सार्प एवमीशः-एते निषिद्धमुहूर्ताः स्युः।[७१]

महापातदोषाः प्रसिद्धाः। वैधृतियोगो वधूं वरं हन्ति। तथा च तं लग्नगुणा रक्षितुमशक्ताः। यथा स्वबान्धवा अशनिनोपघातेन(वज्रपातेन) रक्षितुमसमर्थाः स्युः। शास्त्रात्समानीतमहातिपातदोषास्तथा वैधृतियोगो वधूं वरं च हन्ति। यथा जामदग्न्यक्रोधः समस्तक्षत्रकुलम्। अस्तलग्नमशुद्धं महादोषकारि स्यात्। तत्र विवाहे कृते वरकन्ययोश्च मृत्युर्भवेत्। लग्नगुणा तौ रक्षितुमसमर्थाः। तथा बन्धुवर्गा अशक्तास्तं यथा सर्पदृष्टम्।

---

७० व.सं. अ.३२ श्लो. ८३ त: ८७

७१ व.सं. अ.३२ श्लो. ८८ त: ९२

लग्नांशो(नवांशो) यदि स्वस्वामिना दृष्टः, मित्रशुभग्रहेण दृष्टो युतो वास्तांशः, दम्पत्योः पुत्रपौत्रदः स्यात्।[७२]

उत्पातनक्षत्रं, भूकम्पनक्षत्रं, ग्रहेण विद्धनक्षत्रं वरकन्ययोर्विनाशदं स्यात्। लग्नगुणा तौ रक्षयितुमसमर्थाः, यथा पातकिनं स्वकीयाः। उत्पातनक्षत्रं, ग्रहणनक्षत्रं, क्रूरग्रहेण विद्धं क्रूरग्रहेण युतं नक्षत्रं वा सर्वाणि शुभकर्माणि दह्यते, यथा राघवाग्निः शरोम्बुधिम्। लग्नं महादोषविदूषितं तद्गुणान् रक्षयितुमसमर्थमस्ति। यद्वदन्ये जना बन्धुजनाश्च सर्वे राज्ञा धृतं तं पुरुषं रक्षितुमसमर्थाः। लग्ने स्थिता गुरुबुधशुक्रप्रयाता गुणा महादोषयोगदूषितलग्नं रक्षितुमसमर्थाः। यथैव भ्रष्टं द्विजं तस्य बन्धुजना रक्षितुमसमर्थाः। तल्लग्नं महादोषविदूषितं रक्षितुमसमर्थमस्ति, शूद्रार्थयज्ञा इव चायजूकाः। मित्र-अधिमित्र-उच्चगृहांशजाता गुणा महादोषेण दूषितलग्नस्य रक्षां कर्तुमसमर्थाः, यथा धर्मोऽधर्मरतश्रेष्ठद्विजस्य रक्षां कर्तुमसमर्थः। वर्गोत्तमांशस्तथा चन्द्रजाता गुणा महादोषेन दूषितलग्नमुद्धर्तुमसमर्थाः। यथा निखिलगुणरहितं निर्गुणिनं सर्वे। शुभग्रहाणां केन्द्रे स्थितजाते गुणा महादोषेण दूषितलग्नं रक्षितुमसमर्थाः। यथा पूर्णचन्द्रस्य किरणा जनानामानन्दकराः, किन्तु व्यर्थागुणा इवान्धम्। लाभुस्थाने स्थिता उच्चग्रहोत्पन्नजाता गुणा महादोषेण दूषितलग्नं न रक्षितुं समर्थाः, यथा सुन्दरगुणैर्युतसुन्दर्यां कटाक्षपाता अन्धजनान् नाकर्षयन्ति। धनस्थाने(२), तथा त्रिकोणे(५,९) स्थाने स्थिताः शुभग्रहाणोत्पन्नगुणा निरर्थकाः स्युः, यदि लग्नं महादोषेण दूषितं स्यात्। यद्वद् विबीजिनाम्(षण्ढाणां) अपत्ययोगः। अयं गुणो यद्दोषं नाशयति, यत्रोभयनामपूर्वं ह्युक्तम्। स गुण एवमन्यगुणो, यद्दोषा बहुगुणघातकत्वेन रक्षितुमसमर्थाः। गन्तव्यनक्षत्राद् भुक्तनक्षत्रं तथा च क्रूरग्रहाणां द्वारा महोत्पातेन दूषितदोषास्तदानीं चन्द्रोपभोगादमलेषु शुभेषु कार्येषु शुभप्रदाश्च भवन्ति। द्युरात्रिमध्ये योऽर्धकालः

७२ व.सं. अ.३२ श्लो. ९३ तः ९७

तमखिलमङ्गलेषु वर्जयेत्। सोऽप्यभिजिद्ब्राह्ममुहूर्तकत्वाददोषदः शुभप्रदः स्यात्।

मित्र-अधिमित्र-स्वगृह-स्वोच्च-मूलत्रिकोण-वर्गोत्तमगतग्रहाणां स्वनवांश-केन्द्र-उपचय-त्रिकोण-महादशाधीशा अत्यधिकं बलवन्तः स्युः। नवांशस्वामी यदि शुभग्रहैर्दृष्टो युतो वा तद्वर्गोत्पन्नगुणास्तथा ये सिद्धियोगाः, अमृतसिद्धियोगस्थितिमहागुणाः प्रयाताश्च स्युः, ये चान्यसामान्यगुणाः सदैव स्वस्वभावसंसिद्धगुणास्ते सर्वे कदाचिदेव लग्नजातान् अल्पदोषानपि हन्तुं शक्नुवन्ति। मित्रक्षेत्रे स्थिताः, मित्रनवांशगतग्रहा वा यदि शुभग्रहैर्दृष्टा लग्नं गता वा , तदा लग्नोत्पन्नदोषान् हन्ति। शुभग्रहो यदि अधिमित्रनक्षत्रे, अधिमित्रनवांशे स्थितो दृष्टो वा लग्नगतदोषसमूहान् नाशयति, यथा रामो रावणदैत्यवृन्दान् निहन्ति। स्वक्षेत्रगतः स्वनवांशे स्थितो ग्रहः शुभग्रहैर्दृष्टो लग्नगतस्तदा स दोषान् नाशयति, यथा विशालगजवृन्दान् सिंहो घातयति। उच्चराशौ स्थितः, स्वनवांशगतो वा ग्रहः शुभग्रहेण, स्वमित्रेण निरीक्षितो वा केन्द्रे स्थितस्तदा सम्पूर्णं दोषानां नाशं करोति, यथा भगवद्विष्णोः स्मरणमात्रेण सम्पूर्णं पापं नष्टं भवति। मूलत्रिकोणनक्षत्रगतं, तन्नवांशे स्थितो वा शुभग्रहः, यदि मित्रग्रहेण दृष्टस्तदा स लग्नगतं दोषं नष्टं करोति, यथा चन्द्रधरे प्रणामं कृत्वा सकलपापं नष्टं स्यात्। वर्गोत्तमे स्थितग्रहः, शुभग्रहेण संयुतो वा लग्ने च तेन ग्रहेण दृष्टस्तदा सर्वदोषसमूहान् हन्ति, यथा गरुडः स्वपराक्रमेण शीघ्रं समस्तसर्पसमूहान् नष्टं करोति। लग्ने यदि लग्नेशः शुभग्रहो मित्रनवांशः संस्थितः, लग्नस्याधिमित्रः शुभग्रहाणां नवांशगतः, तस्य उच्च-नवांशे वा गतस्तदाखिलदोषसमूहानां नाशं करोति, यथा वज्रः पर्वतसमूहानां नाशं करोति। लग्नेशः शुभग्रहो यद्यस्तगृहं विहाय केन्द्रगतस्तदाखिलदोषवृन्दान् नाशयति। एकोऽप्युपचयगतः(३,६,१०,११), त्रिकोणे संस्थितः समस्तदोषान् नाशयति,यद्वदनिलो समस्ताभ्रचयं नष्टं करोति। लग्नेशः पापग्रहस्तृतीय-षष्ठ- एकादशस्थाने वा स्थानबलयुतस्तदा लग्नोत्पन्नान्निखिलदोषान् हन्ति, यथा परमाक्षरज्ञः सम्पूर्णपापान् हन्ति।

त्यक्त्वास्तकेन्द्रे–सप्तमस्थानं विहाय केन्द्रे स्थितः शुभग्रहः, त्रिकोणे, लाभस्थाने वा स्थितः शुभग्रहो लग्नोत्पन्नाखिलदोषान् हन्ति, यद्वत्तिमिरं दिनेशः। बलवान् शुभग्रहो धनस्थाने स्थितः, शुभवर्गगतो वा लग्नोद्भवदोषान् निहन्ति, यथा विष्णुपादाब्जतोयं पापसमूहान् नष्टं करोति। सिद्धियोगाः पापेक्षित–उपग्रह–लत्ता–पापदोषान् निहन्ति। लग्न–चन्द्रमस्–जामित्र–घनप्रचार–नीहार–विद्युत्–परिवेषादिसमस्तदोषान्नमृताख्ययोगो निहन्ति, यथा लोभो गुणवृन्दम्। प्रत्यर्क–योग–नक्षत्र–तिथि–इन्द्रचाप–कुवार–पङ्गु–अन्धादियोगान्नमृताख्ययोगो निहन्ति। सिद्धातिथिर्मासदग्ध–मासशून्यादिसमस्तदोषान् नष्टं करोति। तथा सिद्धातिथिर्दिनप्रदग्धान् तथान्यदोषान् नाशयति, यद्वदेकादशीव्रतं सम्पूर्णपापान् नष्टं करोति। एकार्गल–उपग्रह–पात–लत्ता–जामित्र–कर्तरी–उदयादिदोषा लग्ने चन्द्रसूर्ययोर्बलोत्पन्ने नश्यन्ति, यथा दोषाः सूर्यस्योदये नश्यन्ति। ये लग्नदोषाः, कुत्सितनवांशदोषाः, पापग्रहैर्दृष्टिनिपातदोषाः, लग्नस्थगुरुर्निर्मलीकरोति, यथा कतकवृक्षो मलिनजलं निर्मलं करोति। गुणाधिकं तथा दोषविहीनकालं ज्ञात्वा, लग्नेश–लग्ननवांशस्वामिनस्तथान्यग्रहाणां बलाबलं ज्ञात्वा सुसम्यग्विचार्य दैवज्ञो विवाहलग्नविषये प्रवदेत्। नृनार्योर्विवाहे सूर्यबलं गुरुबलं तथा ताराचन्द्रबलं, सुदिनं, सुलग्नं, पञ्चेष्टकं लग्नं प्राप्यम्। सूर्य–चन्द्र–बृहस्पतिग्रहाणां प्रधानता स्यात्। सप्तमशुद्धिरेवं चन्द्रशुद्धिरित्यादिकं ज्ञेयम्। यदि सूर्यगुरौ अष्टम–द्वादश–जन्मादि–दुःस्थानगतौ, द्वयोर्वा तदैकस्य पूजां तत्र कृत्वा सुसम्यग् विवाहकार्यं कारयेत्। स्वनीचराशौ स्थिताः, शत्रुगृहे स्थिताः, शत्रुनवांशे स्थिताः, अस्तश्रेष्ठग्रहाः, यदि लग्ने स्थितास्तदा स्वफलं दातुं न शक्नुवन्ति। यथा दष्टुं भुजङ्गा इव मन्त्रविद्धाः। लग्न–होरा–द्रेष्काण–नवांश–द्वादशांश–त्रिंशांशगतानामेतेषां ग्रहाणां शुभाशुभं षड्वर्गः कथितम्। शास्त्रोक्तमार्गेण सुखलग्नकालं, जलादियन्त्रैः, स्फुटं समानीय संलभ्य परस्परदृष्टिद्वारा मङ्गलसूक्ष्मकालं निरीक्षयेत्। सूर्यस्यार्धोदयं तथास्तकालं (सूर्योदयमेवं सूर्यास्तं दृष्ट्वा) जलपूर्णपात्रमलंकृतं,

तन्मध्ये यन्त्रं स्थापयित्वानन्तरं गन्ध-पुष्प-वस्त्र-फल-अक्षतैर्दैवविदं च पूजयेत्। दशपलताम्रस्यैकस्मिन् सुवृत्तपात्रकृते यत् षडङ्गुलमुच्छ्रितं तथा विस्तारे दशाशाङ्गुलं स्यात्। यस्मिन्पात्रे २४० तोलामितं जलं परिपूर्णं भवति। यत्प्रकारेण जलेन परिपूर्णपात्रमुक्तयन्त्रं षष्टिवारं निपातेत्। यत्पात्रस्थं त्रिभागं कृत्वाद्यतृतीयभाग एवं वृत्तशलाकया मध्यमभागे छिद्रं कृत्वा पुनरङ्गुलदीर्घपात्रे मयूर-नर-वानरादीनां चित्रं कारयेत्।[७३]

लग्नस्य विचारः शङ्कुयन्त्रेण क्रियते। तत्र समतलभूम्युपरि द्वादशाङ्गुलशङ्कुं स्थापयेत्। तत्र व्यासाङ्गुलात्त्रिगुणमायतमिष्टशङ्कोर्वृत्तं स्यात्। गृहसमन्तात् चतुर्भाग एवं गृहस्य वामभागे हस्तोच्छ्रययुक्तां शुभां मण्डपसहितां वेदीं चतुर्भागे पूर्वतः पश्चिम उत्तरे वा सोपानरम्या निबिडां ककुप्सु कारयेत्। तत्र विचित्रतामङ्कुरचित्र-कुम्भ-वितानेन तथा नानाविधतोरणाद्यैः, भृङ्गारपुष्पाङ्गणविप्रपीठ-नृत्याङ्गनाया नृत्यगीतसुवाद्यैस्ताम्बूल-पुष्प-अक्षत-गन्ध-वस्त्रमाङ्गल्यसूत्रैः, फलपूर्णपात्रे, धान्य-हारिद्रागुडैर्वा तथा नेत्राभिरामसुन्दरानेकदीपैः, सवेणुवीणामधुरस्वरेण मङ्गलवेदघोषैः प्रदक्षिणक्रमेण वरकन्ययोश्च वेदीसमीप उपावेशयेत्।[७४]

स्त्रीणां कृते लग्नादिद्वादशभावे स्थितः सूर्यो निम्नलिखितरूपेण क्रमेण प्रत्येकभावे फलं प्रददति। यदि सूर्यो लग्नतः प्रथमभावे स्थितः, तदा मृत्युफलमाप्नोति। यदि सूर्यो लग्नतो द्वितीयभावे स्थितः, तदा धनहीनत्वफलमाप्नोति। यदि सूर्यो लग्नतस्तृतीयभावे स्थितः, तदा बहुविधधनफलमाप्नोति। यदि सूर्यो लग्नतश्चतुर्थभावे स्थितः, तदा पुत्रभ्रातृहानिफलमाप्नोति। यदि सूर्यो लग्नतः पञ्चमभावे स्थितः, तदा व्याधिफलमाप्नोति। यदि सूर्यो लग्नतः षष्ठभावे स्थितः, तदा बहुविधसौख्यफलमाप्नोति। यदि सूर्यो लग्नतः सप्तमभावे स्थितः, तदा भर्तृहानिफलमाप्नोति। यदि सूर्यो लग्नत अष्टमभावे स्थितः, तदा

७३ व.सं. अ.३२ श्लो. ९८ तः १३९

७४ व.सं. अ.३२ श्लो. १४० तः १४४

दीर्घायुरिति फलमाप्नोति। यदि सूर्यो लग्नतो नवमभावे स्थितः, तदा कल्याणकारि फलमाप्नोति। यदि सूर्यो लग्नतो दशमभावे स्थितः,तदा हानिफलमाप्नोति। यदि सूर्यो लग्नत एकादशभावे स्थितः, तदा हृद्रोरोगफलमाप्नोति। यदि सूर्यो लग्नतो द्वादशभावे स्थितः, तदा धनागमफलमाप्नोति। एतत्प्रकारेण भानुर्लग्नादिद्वादशभावे संस्थिते फलं प्रददाति।[७५]

स्त्रीणां कृते लग्नादिद्वादशभावे स्थितः, चन्द्रमा निम्नलिखितरूपेण क्रमेण प्रत्येकभावे फलं प्रददति। यदि चन्द्रमा लग्नतः प्रथमभावे स्थितः, तदा सम्पत्तिनाशफलमाप्नोति। यदि चन्द्रमा लग्नतो द्वितीयभावे स्थितः, तदा बहुविधयशःफलमाप्नोति। यदि चन्द्रमा लग्नतस्तृतीयभावे स्थितः, तदा बन्धुवृद्धिफलमाप्नोति। यदि चन्द्रमा लग्नतश्चतुर्थभावे स्थितः, तदा सन्तानकष्टफलमाप्नोति। यदि चन्द्रमा लग्नतः पञ्चमभावे स्थितः, तदा शस्त्रेण मृत्युर्भवति। यदि चन्द्रमा लग्नतः षष्ठभावे स्थितः, तदाल्पायुःफलमाप्नोति। यदि चन्द्रमा लग्नतः सप्तमभावे स्थितः, तदा सापत्यबाधाफलमाप्नोति। यदि चन्द्रमा लग्नतोऽष्टमभावे स्थितः, प्रव्रज्यत्वफलमाप्नोति। यदि चन्द्रमा लग्नतो नवमभावे स्थितः, तदा कन्यासन्ततिर्जायत इति फलमाप्नोति। यदि चन्द्रमा लग्नतो दशमभावे स्थितः, तदा धनप्राप्तिफलमाप्नोति। यदि चन्द्रमा लग्नत एकादशभावे स्थितः, तदा भोगयुक्ता भवेत्। यदि चन्द्रमा लग्नतो द्वादशभावे स्थितः, तदा स्त्रीणां दास्यफलं भवति।[७६]

स्त्रीणां कृते लग्नादिद्वादशभावे स्थितो भौमो निम्नलिखितरूपेण क्रमेण प्रत्येकभावे फलं प्रददाति। यदि भौमो लग्नतः प्रथमभावे संस्थितः, तदा मृत्युः, द्वितीयभावे स्थितः, तदा शोकस्तृतीयभावे स्थितः, तदा बहुविधधनत्वं, चतुर्थभावे स्थितः, तदा भ्रातृवैरं, पञ्चमभावे स्थितः, तदा कुबुद्धिः, षष्ठभावे स्थितः, तदा लक्ष्मीप्राप्तिः, सप्तमभावे स्थितः, तदा

---

७५ व.सं. अ.३२ श्लो. १४५
७६ व.सं. अ.३२ श्लो. १४६

वरकन्ययोर्मृत्युर्भवेत्। यदि भौमो लग्नतोऽष्टमभावे स्थितः, तदा वित्तनाशः, नवमभावे स्थितः, तदा स्त्रीणां द्वेष्यं, दशमभावे स्थितः, तदा व्यसनेषु निरतत्वं, एकादशभावे स्थितः, तदा पुत्रपौत्र-अर्थसिद्धिर्भवेत्। तथा च द्वादशभावे संस्थितः, तदा भयप्राप्तिः- एतानि फलानि भवन्तीति। एतद् भौमस्य लग्नभावादिसंस्थे द्वादशभावे स्थिते फलं ज्ञेयम्।[७७]

स्त्रीणां कृते लग्नादिद्वादशभावे स्थितो बुधो निम्नलिखितरूपेण क्रमेण प्रत्येकभावे फलं भवति। यदि बुधो लग्नतः प्रथमभावे संस्थितः, तदा प्रीतिः, द्वितीयभावे स्थितः, तदा बुद्धिः, तृतीयभावे स्थितः, तदा सुन्दरगुणः, चतुर्थभावे स्थितः, तदा बन्धुपूजा, पञ्चमभावे स्थितः, तदा सुताप्तिः, षष्ठभावे स्थितः, तदा शत्रुरहितत्वं, सप्तमभावे स्थितः, तदा सन्तानरहितत्वं, अष्टमभावे स्थितः, तदा तनुत्यागचिन्ता, नवमभावे स्थितः, तदा धर्मबुद्धिः, दशमभावे स्थितः, तदा पृथ्वीलाभः, एकादशभावे स्थितः, तदात्यन्तबुद्धिः, तथा च द्वादशभावे संस्थितः, तदा हानिः स्यात्। एतद् बुधस्य लग्नभावादिसंस्थे द्वादशभावे स्थिते फलं ज्ञेयम्।[७८]

स्त्रीणां कृते लग्नादिद्वादशभावे स्थितः, गुरुर्निम्नलिखितरूपेण क्रमेण प्रत्येकभावे फलं प्रददाति। यदि गुरुर्लग्नतः प्रथमभावे संस्थितः, तदा लक्ष्मीप्राप्तिर्भवेत्। यदि द्वितीयभावे स्थितः, तदा सुयशः, तृतीयभावे स्थितः, तदा प्रीतिः, चतुर्थभावे स्थितः, तदान्योन्यवृद्धिः, पञ्चमभावे स्थितः, तदाभीष्टवाप्तिः, षष्ठभावे स्थितः, तदा बहुविधभयं, सप्तमभावे स्थिते, तदाश्रमविरक्तिः स्यात्। यदि गुरुर्लग्नतोऽष्टमभावे स्थितः, तदा पापासक्तता, नवमभावे स्थितः, तदा सुकृतनिरतत्वं स्यात्। दशमभावे स्थितः, तदात्यधिकलाभो भवेत्। एकादशभावे स्थितः, तदा स्त्रीणां सौख्यं तथा च द्वादशभावे संस्थितः, तदा शत्रुकृतभयं

---

७७ व.सं. अ.३२ श्लो. १४७

७८ व.सं. अ.३२ श्लो. १४८

प्राप्नोति। एतद् गुरोः लग्नभावादिसंस्थे द्वादशभावे स्थिते फलं ज्ञेयम्।[७९]

स्त्रीणां कृते लग्नादिद्वादशभावे संस्थितः शुक्रः निम्नलिखितरूपेण क्रमेण प्रत्येकभावे फलं प्रददाति। यदि शुक्रो लग्नतः प्रथमभावे संस्थितः, तदा भोगप्राप्तिः, द्वितीयभावे स्थितः, तदा विविधविभवः, तृतीयभावे स्थितः, तदा स्वैरवृत्तिः, चतुर्थभावे स्थितः, तदा महत्त्वं, पञ्चमभावे स्थितः, तदा धूम्राधिक्यं, षष्ठभावे स्थितः, तदा मृत्युः, सप्तमभावे स्थितः, तदा सर्वनाशो विसुतत्वं, अष्टमभावे स्थितः, तदा तथ्ये प्रीतिः, नवमभावे स्थितः, तदा बहुविधगुणाः, दशमभावे स्थितः, तदा सर्वसम्पत्तिः, एकादशभावे स्थितः, तदा समृद्धिः। तथा च द्वादशभावे संस्थितः, तदा धनप्राप्तिः- एतानि फलानि भवन्ति। एतत् शुक्रस्य लग्नभावादिसंस्थे द्वादशभावे स्थिते फलं ज्ञेयम्।[८०]

स्त्रीणां कृते लग्नादिद्वादशभावे स्थितः शनिः, राहुः, केतुर्वा निम्नलिखितरूपेण क्रमेण प्रत्येकभावे फलं प्रददाति। यदि शनिः, राहुः, केतुर्वा लग्नतः प्रथमभावे संस्थितः, तदा स्वच्छन्दत्वं, द्वितीयभावे स्थितः, तदा कुभोजनत्वं, तृतीयभावे स्थितः, तदा रतिप्रेम, चतुर्थभावे स्थितः, तदा शीलरहितत्वं, पञ्चमभावे स्थितः, तदा व्याधिः, षष्ठभावे स्थितः, तदा श्रीलक्ष्मीः, सप्तमभावे स्थितः, तदा मृत्युर्भवेत्। अष्टमभावे स्थितः, तदा सुखं, नवमभावे स्थितः, तदा गर्भपातवृत्तिः, दशमभावे स्थितः, तदा द्यूतासक्तत्वं, एकादशभावे स्थितः, तदा वैभवं प्राप्नोति। तथा च द्वादशभावे संस्थितः, तदा वक्त्ररोगः स्यात्। एतत् शनिः, राहुः, केतुर्वा लग्नभावादिसंस्थे द्वादशभावे स्थिते फलं ज्ञेयम्।[८१]

सर्वे ग्रहा लग्नतः सप्तमस्थाने स्थिता मरणं विदधति। सौरिः सूर्यो वा लग्नतस्तृतीय-षष्ठ-अष्टम-एकादशस्थाने वा स्थितः प्रशस्तः कथितः। भौमः, शशाङ्कः वा एकादश-षष्ठ-

---

७९ व.सं. अ.३२ श्लो. १४९

८० व.सं. अ.३२ श्लो. १५०

८१ व.सं. अ.३२ श्लो. १५१

तृतीयस्थाने वा संस्थितः शुभदः स्यात्। विवाहपरत्वे बुधो लग्नतोऽन्त्य-अष्ट-अरि(१२-६-८) स्थानविवर्जितः शुभः स्यात्। लग्न-द्वितीय-तृतीय-चतुर्थ-पञ्चम-सप्तम-नवम-दशम-एकादशस्थाने स्थितः शुभः स्यात्। द्वादशस्थाने स्थितो बुधो मृत्युप्रदानं करोति। गुरुः, शुक्रः, वा सुतायास्पदनवमगतो( पञ्चम-एकादश-नवमस्थाने)नेष्टः। लग्ने संस्थितशुभग्रहकारणेन विवाहितकन्या सुपुत्रवती भवति। तथापि क्रूरग्रहाश्चन्द्रश्चापि सप्तभिरब्दैः कन्यायै वैधव्यं ददाति। विसिता चन्द्रसहिता सर्वे सौम्यग्रहाः(चन्द्रमाः,बुधः गुरुः) तृतीयस्थाने स्थिताः, वित्तमेवं सौख्यं प्रददति। तथापि तृतीयस्थाने स्थिताः पापग्रहाः सदैव सौभाग्यमेवं पुत्रप्राप्तिरिति फलं ददाति। चन्दमसा युताः शुभग्रहाः(चन्द्रः, बुधः, गुरुः, शुक्रः) चतुर्थस्थाने स्थिताः साध्वीमेवं पतिप्रियां कुर्वन्ति। तथापि चतुर्थस्थाने स्थिता अशुभग्रहाः (भौमः, सूर्यः, शनिः, राहुः/केतुः) कन्यां दुःशीलां दुर्भगां च कुर्वन्ति।। तनयगता चन्द्रसहिता शुभग्रहाः पञ्चमस्थाने स्थिताः कन्यकानां बहुसन्तानयुतां, मानिनीमेवं सुशीलवतीं कुर्वन्ति। यद्यपि पञ्चमस्थाने स्थिता अशुभग्रहाः सन्तानरहितामेवं विवादशीलां कुर्वन्ति। षष्ठस्थाने स्थितश्चन्द्रमा एवं शुक्रः सप्तसंवत्सरात् कन्यकायै वैधव्यं ददाति। यद्यपि पापग्रहाः स्थिताः पापनिरतां कुर्वन्ति। तथा च शुभग्रहाः प्रभूतशीलवतीं कुर्वन्ति। सप्तमस्थाने स्थिताः सर्वे ग्रहाः(शुभास्तथा पापाः) दम्पत्योर्यमरक्षितमपि सप्तभिरब्दैः सप्तमासैश्च सहमरणं कुर्वन्ति। अष्टमस्थाने स्थितचन्द्रभौमकारणेन कन्या पञ्चभिवर्षैर्धनरहिता स्यात्। शुभग्रहकारणेन कापटिका तथा चेतरग्रहाकारणेन साध्वी तथा चिरंजीविनी स्यात्। चन्द्रमसा सहिता शुभग्रहा नवमस्थाने स्थिताः, कन्यकानां भोग-भाग्यामेवं सौख्यवतीं कुर्वन्ति। तथा च पापग्रहा दुष्टचित्तां, परपुरुषासक्तां पापवादिनीं कुर्वन्ति। चन्द्रमसा सहिताः शुभग्रहा दशमस्थाने स्थिताः कन्यकानां भर्तृपूजितामेवं साध्वीं कुर्वन्ति।[८२]

---

८२ व.सं. अ.३२ श्लो. १५२ तः १६१

तथा च पापग्रहा: प्रतिकूलां, मलिनाङ्गीं कर्कशामेवमनृतां कुर्वन्ति। लाभस्थाने स्थिता: सकलग्रहा: कन्यकानां बहुविधधन-धान्य-पुत्रपौत्रवतीं पतिभक्तामेवं शीलवतीं कुर्वन्ति। यदि ग्रहा नीच-अस्त-शत्रुराशिगाश्च तथाप्युक्तफलप्रदत्वमिति। व्ययस्थाने स्थिता: सकलग्रहा: कन्यकानां दुग्धाब्धिभवां पञ्चभिर्वर्षे विधवां कुर्वन्ति। शुभग्रहा मानविहीनां तथा च पापग्रहा नीचवृत्तवतीं कुर्वन्ति। शुभग्रहा: सद्-असत्स्थानेषु शुभाशुभफलं प्रददति। अथ सम्यग्ज्ञात्वा तयो: शुभफलमधिकं प्रगृह्णीयात् तदनुसारेण फलं कथयेत्। तत्राधिकफलवृन्दे दोषसमूहा: स्वयं विनाशमायान्ति। यद्वत् शशाङ्ककिरणै: कलङ्कमखिलम्। देशे, काले, शरीरे, राज्येऽपि आपत्ति: स्यात्, तदा यत्र-तत्र भावान्तरं गान्धर्वविवाहचतुष्टयार्थं तत्परिकल्पनीयम्। लग्ने तथा भावादिरुदितो, भावे स्थित एवं लग्ने स्थित:, तथा द्वितीयस्थानगतग्रहाणां द्वारा तत्प्रकारै: फलं कथयेत्। तथा शेषराशिषु शेषभावा: क्रमेण सम्यक् कल्पनीया:।[८३]

ब्राह्म-प्राजापत्य-दैव-आर्षसंज्ञकविवाहा: प्रोक्तकाले विधेया:। किन्तु गान्धर्व-आसुर-राक्षस-पिशाचा- एते चतुर्विवाहा: सर्वकाले विधेया:। ब्राह्मविवाहोत्पन्नबालक एकविंशतिस्वकुलपुरुषान् पवित्रं करोति। ब्राह्मविवाहे वरं स्वगृहे आहूय स्वशक्त्यानुसारमलंकृता कन्या दीयते। प्राजापत्यविवाहोत्पन्नबालक: षट् षड् वंश्यकुलपुरुषान् पावयेत्। प्राजापत्यविवाहे वरं पूजयेत्, चरतामनया धर्ममित्युक्त्वा धनं दत्त्वा कन्या दीयते। दैवविवाहोत्पन्नबालक उभयत: सप्त सप्त कुलपुरुषान् पावयेत्। दैवविवाहे यथाविधि यज्ञसम्पन्नकर्तारमृत्विजं कन्या दीयते। आर्षविवाहोत्पन्नबालको द्वादशकुलपुरुषान् पावयेत्। आर्षविवाहे वरं स्वगृहमाहूय गोद्वयं स्वीकृत्य कन्या दीयते। गान्धर्वविवाहे वरकन्ययोरन्योन्यं परस्परं प्रेम भवति, तेन कारणेन गान्धर्वविवाहो भवेत्। आसुरविवाहेऽर्थप्रदानतो विवाहं कारयेत्। राक्षसविवाहे युद्धं कृत्वा, कन्यकाया अपहरणं

---

८३ व.सं. अ.३२ श्लो. १६२ त: १६८

कृत्वानन्तरं विवाहो भवेत्। पिशाचविवाहे कन्यकाच्छलाद् विवाहो भवेत्।[८४]

SMT. HANSA MEHTA LIBRARY

## वधूवरयोर्मेलापकेऽष्टादशकूटानां विचारः —-

वर्णकूटम्(१), गणकूटम्(२), महेन्द्रकूटम्(३), स्त्रीदूरकूटम्(४), योनिकूटम्(५), राशिकूटम्(६), राश्याधिपः(७), वश्यम्(८), नाडीकूटम्(९), वेधकूटम्(१०), भूतकूटम् (११), लिङ्गम्(१२), विजातिः(१३), गोत्रम्(१४), पक्षीकूटम्(१५), आयकूटम्(१६) योगिनीकूटम्(१७), तथा सुधांशयुजः (१८), एतान्यष्टादश कूटानि सन्ति।

१. वर्णकूटम् — वरस्य नक्षत्रात् कन्याया नक्षत्रपर्यन्तं गणनीयम्। तथा च कन्यानक्षत्रादारभ्य वरस्य नक्षत्रपर्यन्तं गणनीयम्। नवर्क्षपर्यायवशात् जन्मनक्षत्रतस्तृतीय-पञ्चम-सप्तमनक्षत्रं त्यक्त्वान्यनक्षत्राणि शुभानि सन्ति।[८५]

२. गणकूटम् —अश्विनी-पुनर्वसु-पुष्य-मृगशीर्ष-अनुराधा-हस्त-स्वाती-रेवती - श्रवणम्- एतानि नवनक्षत्राणि देवगणः प्रदिष्टः। पूर्वाफाल्गुनी-पूर्वाषाढा-पूर्वाभाद्रपदा-भरणी-रोहिणी-आर्द्रा-उत्तराफाल्गुनी-उत्तराषाढा-उत्तराभाद्रपदा- एतानि नव नक्षत्राणि मनुष्यगणः प्रदिष्टः। मघा-विशाखा-कृत्तिका-शतभिषा-ज्येष्ठा-मूल-धनिष्ठा-आश्लेषा-चित्रा - एतानि नव नक्षत्राणि राक्षसगणः प्रदिष्टः। देवगणस्य तथा राक्षसगणस्य परस्परं वैरं स्यात्। तथा च मनुष्यगण-राक्षसगणयोर्मध्ये वैरं स्यात्। अन्येषु परस्परं महास्नेहः स्यात्।[८६]

३. माहेन्द्रकूटम् — वधूनक्षत्रतो वरस्य नक्षत्रं ४-१०-१-१३-१६-१८-२२-

---

८४ व.सं. अ.३२ श्लो. १६९ तः १७४

८५ व.सं. अ.३२ श्लो. १७६

८६ व.सं. अ.३२ श्लो. १७७, १७८

२५ स्यात्, तदा वधूवरयोरतीव प्रीतिः स्यात्। एतन्माहेन्द्रकूटं कथ्यते।[८७]

४. स्त्रीदूरकूटम् — स्त्रीधिष्ण्यत आद्ये नवके गणनीये वरस्य नक्षत्रं स्यात्, तदा तयोर्वैरं स्यात्। द्वितीये गणनीये नवमनक्षत्रं स्यात्, तदा सामान्यं तथा च तृतीये नवके श्रेष्ठम्। एतत्स्त्रीकूटं कथ्यते।[८८]

५. योनिकूटम् — अश्विनी–शतभिषानक्षत्रयोरश्वयोनिः, भरणी–रेवतीनक्षत्रयोर्गजयोनिः, पुष्य–कृत्तिकानक्षत्रयोर्मेषयोनिः, रोहिणी–मृगशीर्षनक्षत्रयोः सर्पयोनिः,मूल–आर्द्रानक्षत्रयोः श्वयोनिः, पुनर्वसु–आश्लेषानक्षत्रयोर्मार्जारयोनिः, मघा–पूर्वाफाल्गुनीनक्षत्रयोर्मूषकयोनिः, उत्तराफाल्गुनी–उत्तराभाद्रपदानक्षत्रयोर्गोयोनिः,चित्रा–विशाखानक्षत्रयोर्व्याघ्रयोनिः, स्वाती–हस्तनक्षत्रयोर्महिषयोनिः,पूर्वाषाढा–श्रवणनक्षत्रयोः कपियोनिः, ज्येष्ठा–अनुराधानक्षत्रयोर्मृगयोनिः, उत्तराषाढा–अभिजिन्नक्षत्रयोर्नकुलयोनिः, तथा च धनिष्ठा–पूर्वाभाद्रपदानक्षत्रयोः सिंहयोनिर्ज्ञेया। गो–हस्ती–इत्यादयो यथा क्रमेणाश्विन्यादिनक्षत्रेषु स्थिताः खलु कल्पितयोनिरूपा भवन्ति। प्रवरबुद्धिमान्, त्रिस्कन्धज्ञाता दैवज्ञोऽखिलसद्–असद्विचार्य सम्यक्कथयेत्। श्वा–मृगौ, गज–सिंहौ, मार्जार–मूषकौ,अज–वानरौ, गो–व्याघ्रौ, अश्व–महिषौ–एतयोः परस्परं वैरं स्यात्। अतो नृ–नार्योः, नृपभृत्ययोः, राजा–प्रेष्ययोः, तथा च वरकन्ययोः कुण्डलीमेलापके तयोर्योनिवैरं विचार्य सम्यङ्निर्णयं वदेत्।[८९]

६. राशिकूटम् — वरकन्ययोः षष्ठ–अष्टके परस्परराशिः स्यात्, तदा कन्याया मृत्युः– इति फलं लभ्यते। वरकन्ययोर्नवम–पञ्चमे परस्परराशिः स्यात्, तदापत्यहानिः स्यात्।

---

८७ व.सं. अ.३२ श्लो. १७९

८८ व.सं. अ.३२ श्लो. १८०

८९ व.सं. अ.३२ श्लो. १८१ तः १८३

वरकन्ययोर्द्वि–द्वादशे परस्परराशिः स्यात्, तदा निर्धनता भवेत्। तथा चान्यराशिषु परस्परं प्रीतिः स्यात्।। तत्र कनिष्ठराशिकूटं त्रिविधं स्मृतम्। अन्योन्यपरिवर्तितस्तदा मध्यमं तथापरं सदा मध्यमं स्यात्। एकाधिपत्ययोगे, मित्रभावे वा स्त्रीपुरुषराश्योर्नवरज्जुदोषेऽपि षष्ठाष्टकदोषः सुखप्रदः। अत एतद्योगे तयोर्विवाहकर्म कारयेत्। षष्ठाष्टकः, नवम–पञ्चमः, द्विर्द्वादशयोग एकाधिपत्ये, मित्रभावे स्यात्, तदा विवाहं कारयेत् , सुखं प्रददाति। वर–कन्ययोः परस्परं शत्रुराशौ स्थिते षट्काष्टदोषो भवेत्, तदा विवाहस्त्याज्यः। सर्वैर्गुणैः समन्वितेऽपि नाडीदोषकारणेन मृत्युर्भवेत्। तत्र मध्यनाडी पतिं हन्ति। पार्श्वनाड्योः(आद्ये, अन्ते) कन्यका हानिः। अतो दम्पत्योः कल्याणमिच्छता नाडीदोषः सदा त्याज्यः। उत्तमराशिकूटे विवाहः शुभदो भवेत्। समे मध्यमस्तथा शत्रुकारणात् कनिष्ठो (अधमो) भवेत्। स्त्रीदूरे, समसप्तके(१, ७), त्रिरेकादशे(३, ११), चतुर्थदशमे(४,१०) शत्रुसमकारणेन समस्तथा च मित्र–मित्रकारणेन परमं सुहृद्(अधिमित्रं) स्यात्। मिथुन–तुला–मेष–कुम्भ–धनु–सिंहाः– एता राशयो निरन्तरं मित्रभावं कुर्वन्ति। स्वषष्ठसंख्याभवने स्थितास्तदापि स्व–स्व–अष्टभवने स्थितैर्ग्रहैरेकतां कुर्युः। वरकन्ययोः परस्परं यदि जन्मराशयः शत्रुरूपास्तदा तत्तथा च प्रीतिषष्ठाष्टमं पाणिग्रहणे(विवाहे) सदा त्याज्यम्। वरकन्ययोरेकराशौ भिन्ननक्षत्राणि , भिन्नराशावेकनक्षत्रं वा (एकराशिपृथग्धिष्ण्ये, एकधिष्ण्ये पृथग्राशौ वा) विवाह उत्तमः। किन्तु सर्वैक्ये मृत्युदः स्यात्। वरकन्ययोर्जन्मभं जन्मधिष्ण्येन तथा च नामधिष्ण्येन नामभं विचारो विवाहमेलापके कार्यः। विपरीतेन दम्पत्योर्निधनप्रदः – इति फलम्। यस्य जन्मराशिरज्ञाता, तस्य नामराशिं परिकल्पयेत्। तेनैव पूर्ववत् जन्मराशिवत् राशिकूटादिकं सर्वं चिन्तयेत्।[९०]

---

९० व.सं. अ.३२ श्लो. १८४ तः १९६

७. राश्याधिपकूटम्(सूर्यादिग्रहाणां मैत्रीविचार:) —

१ सूर्य: - रवे: समो बुध:, शत्रु: शुक्र एवं शनि:, तथा अन्ये ग्रहा:(चन्द्र:, मङ्गल:, गुरु:) मित्राणि सन्ति।

२ चन्द्रमा: - चन्द्रस्य न कोऽपि शत्रु:, सूर्य एवं बुध: मित्रौ, तथा शेषग्रहा:(मङ्गल:, गुरु:, शुक्र एवं शनि:) समा भवन्ति।

३ भौम: — भौमस्य सम: शुक्र एवं शनि:, शत्रु: बुध:, तथा शेषा: सर्वे ग्रहा:(सूर्य:, चन्द्र:, गुरु:) मित्राणि स्यु:।

४ बुध: — बुधस्य शत्रुश्चन्द्रमा: स्यात्। सूर्य:, शुक्र:, मित्रम् तथा च शेषा: सर्वे ग्रहा:(मङ्गल:, गुरु:, शनि:) समा: स्यु:।

५ गुरु: — गुरो: शत्रु: बुध एवं शुक्र:, सम: शनिस्तथा च अन्ये ग्रहा:(सूर्य:, चन्द्र:, मङ्गल:)मित्राणि।

६ शुक्र: - शुक्रस्य मित्रं बुध एवं शनि:, समो भौम एवं गुरुस्तथा सूर्य एवं चन्द्र: शत्रु: स्यात्।

७ शनि: - शने: समो बृहस्पति:, मित्रं बुध:-शुक्रस्तथा अन्ये ग्रहा:(सूर्य:, चन्द्र:, मङ्गल:) शत्रव: स्यु:। ग्रहाणां शत्रु-मित्र-समत्वं ब्रह्मणोक्तम्। अर्थात् -ग्रहाणां मैत्री पितामहसंहितायां कथिता।[९१]

८. वश्यकूटम् — पुरुषराशय: सिंहराशिं त्यक्त्वा अन्या राशयो वश्या:। वृश्चिकराशिं विहाय अन्या राशय: सिंहराशौ वश्या:। वरकन्ययो: पारस्परिकसम्बन्धज्ञानं लोकतोऽन्यप्रसिद्धं ज्ञेयम्। तत्र वृश्चिकराशिर्वश्यावश्या नैव स्यात्।[९२]

---

९१ व.सं. अ.३२ श्लो. १९७ त: २००

९२ व.सं. अ.३२ श्लो. २०१

९. नाडीकूटम् — अश्विन्यादिनक्षत्राणां त्रिभिश्चावृत्ताभिः क्रमात्क्रमात्संगणयेत्। यदि एकस्मिन् पर्व उभयोश्च नक्षत्रं स्यात्, तदा नृनार्योरेकनाडीकारणेनोभयोश्च नेष्टा ज्ञेया। तत्र मध्यनाडी वरं निहन्ति। पार्श्वनाडी(अन्ता) कन्यकां निश्चयेन निहन्ति। तथा समीपनाडी(आद्यनाडी)संवत्सरत्रयाद् वरकन्ययोर्मृत्युप्रदा।[९३]

१०. वेधकूटम् — अश्विनी-पूर्वा, भरणी-अनुराधा, कृत्तिका-विशाखा, स्वाती-शतभिषा, मृगशीर्षम्-उत्तराषाढा, चित्रा-पूर्वाभाद्रपदा, आर्द्रा-श्रवणम्, उत्तराषाढा-हस्तम्,पुष्यं-स्वाती, मूलं-आश्लेषा,रेवती-मघा, पूर्वाफाल्गुनी-उत्तराभाद्रपदा, शतभिषा-आश्लेषा, ज्येष्ठा-उत्तराफाल्गुनी- एतानि नक्षत्राणि परस्परवेधकारणेन विवाहे सदा वर्जनीयानि।[९४]

११. भूत (गण्डभूत)कूटम् — अश्विनीनक्षत्रतः सप्तविंशतिनक्षत्राणि पञ्च पञ्च गणनाक्रमेण धरा-अम्ब-अग्नि-अनिल-अम्बर(पृथ्वी-जल-अग्नि-वायु-आकाश)संज्ञकानि स्युः। तत्र पञ्चमहाभूतानां क्रमेण जलाग्न्योर्वैरं, इतरत्र वृद्धिर्भवेत्।[९५]

१२. लिङ्गकूटम् — सर्पात्-चतुष्कं आश्लेषा-मघा-पूर्वाफाल्गुनी-उत्तराफाल्गुनी, धनिष्ठा, पूर्वाषाढा, आर्द्रा, चित्रा, स्वाती, विशाखा, उत्तराषाढा, रेवती, भरणी तथा ज्येष्ठा - एतानि चतुर्दशनक्षत्राणि स्त्रीलिङ्गसंज्ञकनक्षत्राणि ज्ञेयानि। श्रवणं-मृगशीर्षं-मूलम्- एतानि त्रीणि नक्षत्राणि नपुंसकसंज्ञकनक्षत्राणि तथा चान्यानि शेषाणि नक्षत्राणि(अश्विनी, कृत्तिका, रोहिणी, पुनर्वसुः, पुष्यं, हस्तः, अनुराधा, शतभिषा, पूर्वाभाद्रपदा, उत्तराभाद्रपदा) पुरुषसंज्ञकनक्षत्राणि कथ्यन्ते। वरकन्ययोः स्वकीयलिङ्गेषु जन्मनक्षत्रं स्यात्, तदान्योन्यं परस्परमधिकं प्रीतिः स्यात्। विपरीतेन युद्धं भवति। स्त्री-पुरुषलिङ्गसंज्ञकनक्षत्राणां

---

९३ व.सं. अ.३२ श्लो. २०२, २०३
९४ व.सं. अ.३२ श्लो. २०४, २०५
९५ व.सं. अ.३२ श्लो. २०६

नपुंसकेषु संयोगश्चेत् सामान्यफलमिति ज्ञेयम्।[९६]

१३. विजातिकूटम् — अश्विन्यादिनक्षत्राणि क्रमेण रेवतीनक्षत्रपर्यन्तं ब्राह्मण-क्षत्रिय-वैश्य-शूद्राद्याश्चत्वारो जातयः, पञ्चमं सङ्करः तथा षष्ठमन्यजातिप्रभेदा ब्राह्मणादिक्रमेण ज्ञेयाः। क्रमेण त्रितयजात्योत्पन्नयोर्वरकन्ययोर्नक्षत्राणि शुभानि कथ्यन्ते। अतः सम्यग्विचार्यं जातिकूटफलमनुक्रमेण वदेत्। वरकन्ययोरेकजात्यामतुला प्रीतिः स्यात्। पुंजातितो स्त्री हीनकुला स्यात् तदा समा, तथा च स्त्रीजातितः पुरुषो हीनकुलः श्रेष्ठः। किन्तु विलोमजात्यामपि तीव्रवैरं स्यात्।[९७]

१४. गोत्रकूटम् — भचतुष्टयेन नक्षत्राणां, अभिजिन्नक्षत्रसहितानामष्टविंशति - नक्षत्राणां चतुश्चतुर्भागं कृत्वा सप्तगोत्राणि स्युः। एतानि क्रमेण मरीच-वसिष्ठ-महाङ्गिरस्-अत्रि-पौलस्ति-पुलह-क्रतु-एतानि ज्ञेयानि। यदैकगोत्रे वरकन्ययोर्विवाहः स्यात्, तदा निरन्तरकलहस्तथा भिन्नगोत्रे प्रीतिं वृद्धिंगतां कुर्यात्। एष खलु प्रधानगोत्रवर्गविचारो नृनारीविवाहे सततं विचिन्तयेत्।[९८] भिन्नगणे कलहस्तथैकगणे वृद्धिः स्यात्।[९९]

१५. पक्षिकूटम् — भेरुण्ड-पिङ्गलक-काक-कुक्कुट-मयूर- एते पञ्च गणाः अश्विन्यादिनक्षत्रक्रमेण कथिताः। बाण-ऋतु-षट्-शर-शरैः क्रमशो विवाहे शुभदायकाः स्युः।

१६. आयकूटम् —– अश्विन्यादिनक्षत्राण्यष्टौ भाजिता ध्वजादि -आयानां निर्धारणं कर्तव्यम्। तत्र पुनः पुनः आवृत्त्या त्रैवर्णिकं भत्रितयं च श्रेष्ठम्। किन्तु पञ्चमेन खल्वन्योन्यं द्वेषः स्यात्।[१००]

---

९६ व.सं. अ.३२ श्लो. २०७, २०८
९७ व.सं. अ.३२ श्लो. २०९, २१०, २११
९८ व.सं. अ.३२ श्लो. २१२, २१३
९९ व.सं. अ.३२ श्लो. २१४
१०० व.सं. अ.३२ श्लो. २१५

१७. योगिनीकूटम् -- ब्रह्माणी-कौमारी-वाराही-वैष्णवी-माहेन्द्री-चामुण्डा-माहेशी-लक्ष्मी:-एता अष्टयोगिन्य: कथ्यन्ते। सर्वयोगिन्यैक्ये पूर्ववत् -अर्थात् त्रैवर्णिकं भत्रितयं शुभमन्यथाशुभम्। अतो विवाहमेलापके सर्ववर्गाणां कृते योगिनीकूटविचार: कर्तव्य:। प्रतिपत्सु नवम्यां तिथौ च योगिनी पूर्वदिशि स्यात्। पूर्वदिशाया ग्रहस्वामी सूर्यस्तथा देवता इन्द्र: स्यात्। दशमीद्वितीयतिथ्योर्योगिन्यग्निकोणे स्यात्। अग्निकोणदिशाया ग्रहस्वामी मङ्गलस्तथा देवताग्नि: स्यात्। तृतीयैकादशीतिथ्योर्योगिनी दक्षिणदिशि स्यात्। दक्षिणदिशाया ग्रहस्वामी गुरुस्तथा देवता यम: स्यात्। चतुर्थीद्वादशीतिथ्योर्योगिनी नैऋत्यकोणे स्यात्। नैऋत्यकोणदिशाया ग्रहस्वामी शनिस्तथा देवता नैर्ऋत्य: स्यात्। त्रयोदशीनवमीतिथ्योर्योगिनी पश्चिमदिशि स्यात्। पश्चिमदिशाया ग्रहस्वामी शुक्रस्तथा देवता वरुण: स्यात्। चतुर्दशीषष्ठीतिथ्योर्योगिनी वायव्यकोणे स्यात्। वायव्यकोणदिशाया ग्रहस्वामी चन्द्रमास्तथा देवता वायु: स्यात्। द्वादशीपञ्चमीतिथ्योर्योगिन्युत्तरदिशि स्यात्। उत्तरदिशाया ग्रहस्वामी शनिस्तथा देवता कुबेर: स्यात्। अष्टम्यमावस्यातिथ्योर्योगिनी ईशानकोणे स्यात्। ईशानकोणदिशाया ग्रहस्वामी राहुस्तथा देवता महादेव: स्यात्।[१०१]

१८. सुधांशयुजोकूटं — अश्विन्यादिनक्षत्राणां क्रमेणाष्टभिश्च ज्ञात्वा वरकन्ययोर्दिक्स्वामिन: ग्रहाधिर्पस्तथा तिथिस्वामिनो ज्ञेया:। तत्र तयोर्मित्रत्वे मित्रता, शत्रुत्वे शत्रुत्वं ज्ञेयम्।[१०२]

एतत्प्रकारेण विवाहे दैवज्ञोऽष्टादशकूटविचारं सम्यग्ज्ञात्वा विवाहपरत्वे निर्णयं कारयेत्। ग्रह-मित्रग्रहविचार: सदैव ब्राह्मणवर्णानां कृते, ग्रहसंज्ञकविचार: क्षत्रियवर्णानां कृते, स्त्रीदूरविचारो वैश्यानां कृते तथा च योनिवर्गविचार: शूद्राणां कृते करणीय:। राशिकूटं तथा तस्य स्वामिनो मैत्रीविचार:, स्त्रीदूरत्वं, गण:, योनि:, नाडी, संयोगस्तथा वरगोत्रम्-

---

१०१ व.सं. अ.३२ श्लो. २१६ त: २२१

१०२ व.सं. अ.३२ श्लो. २२२

इत्यादिकूटानां विचारं विवाहेऽवश्यं परिचिन्तयेत्। मध्यंदिनगते सूर्येऽभिजित्संज्ञकमुहूर्तः स्यात्। स दिनस्याष्टममुहूर्तः सर्वदोषानां नाशं करोति, यथा सूर्योऽन्धकारं नाशयति। सर्ववर्णेषु, सर्वदेशेष्वभिजित्संज्ञकमुहूर्तो महान् ज्ञेयः। यः सर्वदोषहारकोऽस्ति, यथा भगवतो विष्णोर्हरिनामद्वयाक्षरस्मरणेनाखिलपापं नष्टं भवति। सूर्यतः सप्तमलग्नं गोधूलिसंज्ञको मुहूर्तः कथ्यते। स सर्वदोषहरो यथा गङ्गाजलं पापं हरति। गोधूलिकं, योगलग्नं, भावविचारः- इत्यादिकं गान्धर्वादिविवाहेषु तथा वैश्यविवाहेषु योजयेत्। पुत्रविवाहात्पश्चात् षण्मासात् पुत्र्या विवाहं न कारयेत्। तदूर्ध्वं कुर्यात्। तद्वन्मण्डनान्मुण्डनं प्रत्युद्वाहश्च नैव पुण्याय भवेत्।[१०३]

पितामहेन निर्गमात्पूर्वतः प्रवेशो न शुभ इति कथितम्। तत्रावधिः संवत्सरपर्यन्तं कथितः। स्त्रीविवाहपश्चात्पुरुषविवाहः शुभः स्यात्। विवाहपश्चान्मुण्डनं(उपनयनसंस्कारो) न शुभः कथ्यते। सर्वे कन्याविवाहा निर्गमा इति कथ्यन्ते। तथा पुरुषाणां विवाहः प्रवेश इति कथ्यते। पुत्रीविवाहात्परतः पुत्रविवाहकर्म सदैव शुभप्रदं स्यात्। ऋतुद्वयान्तरे पुत्रद्वयोः पुत्रीद्वयोर्वा विवाहकर्म नैव कारयेत्। यद्येकोदरप्रसूतानामेकस्मिन्संवत्सरे विवाहे निश्चयेन तत्रैका विधवा भवेत्। एकजन्यानां(यमलानां), पुत्रपुत्र्योर्वा ऋतुत्रयं कालान्तरेण - षण्मासाद् विवाहकर्म न विधेयम्। तत्करणे पक्षमध्ये, त्रयाब्दाद् वा तयोरेको हन्यते। एकजन्यानां पुत्रपुत्र्योर्वा एकस्मिन्कुले विवाहं कारयेत्, तदा संवत्सरात् तत्रैका नाशं वैधव्यं वा फलं प्राप्नोति। पुत्रविवाहपश्चात्पुत्रीविवाहे षण्मासात् शुभदं न। तथाब्दान्तरे मुण्डनम्। एकस्मिन् संवत्सरे न कदापि मुण्डनद्वयम्। एकजन्यानां तु द्वे कन्ये, एकजन्ये तु द्वे पुत्रयोः पुत्रिकाद्वयमेकस्मै न कदाचन दद्यात्। मूलनक्षत्रोत्पन्नः पुत्रः पुत्री वा शीघ्रं श्वशुरं हन्ति। तदन्त्यपादाज्जनितो न निहन्ति।। ज्येष्ठानक्षत्रोत्पन्ना कन्या धवाग्रजं तथा विशाखानक्षत्रोत्पन्ना कन्या देवरं हन्ति। ज्येष्ठानक्षत्रोत्पन्नः पुत्रः स्वाग्रजं हन्ति। यद्यपि ज्येष्ठानक्षत्रोत्पन्ना कन्या

---

१०३ व.सं. अ.३२ श्लो. २२३ तः २३१

स्वाग्रजं नैव हन्ति। महर्षिभी रचितान् शास्त्रान् स्वबुद्ध्या न दूषयेत्। कुल-देशधर्माणां मूलं समस्तवेदेषु। अत: मुख्यरूपेण प्रथमकुलाचारो देशाचारश्च ज्ञेय:। मूल एवमाश्लेषानक्षत्रोत्पन्ना कन्या भर्तुर्मातापितरौ हन्ति। मूलस्यान्तिमचरणं तथा चाश्लेषानक्षत्रस्य प्रथमचरणं न दोषयुक्तं भवेत्। विवाहारम्भाद् वधूप्रवेशो वा दिनत: षष्ठ- अष्ट-दशमे वा दिने पञ्चाङ्गसंशुद्धिं विनापि यात्रादिकार्यं कारयेत्। प्रायश्चित्तं, चिकित्सां, ज्योतिषं, धर्मनिर्णय:- आदिकं विना शास्त्रेण यो ब्रूयात् , स ब्रह्मघातक: कथ्यते।[१०४]

## १.४.१० राजाभिषेक :

वृद्धवसिष्ठसंहिताग्रन्थे त्रयस्त्रिंशत्यध्याये राजाभिषेकाध्याये षष्ठी(६०) श्लोका: सम्मिलिता:।

उत्पातदोषादिविवर्जितेषु, तथाधानलग्नेश:, राश्याधिप:, दशाधिप:, सूर्य- चन्द्र- भौम-गुरु-शुक्रग्रहै:-बली स्यात्. तदा नृपस्य राज्याभिषेक इष्ट:। यत्समये सर्वे ग्रहा: मूलत्रिकोणे, स्वगृहौ, उच्चराशौ, मित्रराशौ तन्नवांशे वा स्थिता:, तत्लग्ने, शुभलग्ने राज्याभिषेकं कुर्वन् नृपो विपुलां, लक्ष्मीं, कीर्तिं च प्राप्नोति। यदि ग्रहा: स्वनीचराशौ, शत्रुराशौ, नवांशे वा, सूर्येण सह अस्तङ्गता:, वक्रिण:, पापगतास्तथा च पापग्रहाणां लग्ने राज्याभिषेकं कुर्वन् राजा अकीर्तिं, शोकम्, अपयशादिकं प्राप्नोति। स्वजन्मलग्नतश्चन्द्रतो वा शीर्षोदयें लग्ने, उपचयस्थाने(३,६,१०,११) स्थितराशौ तथा लग्नं यदि शुभग्रहेण युतं दृष्टं वा तदा तत्समये राज्ञां राज्याभिषेक: कृतस्तदा पदं स्थिरं भवेत्। रिक्तासु (४,९,१४ तिथिषु), अमावस्यायां, बुधभौमवासरयोर्विवर्जिते, चन्द्रेण दूषितनक्षत्रदिन एवमष्टमभावस्थिते चन्द्रे राज्याभिषेककरणे नेष्टान्यतस्त्याज्यानि। यदि पापग्रहा लग्नगता:, स्वान्त्यगताश्च, तदा

---

१०४ व.सं. अ.३२ श्लो. २३२ त: २४४

राज्याभिषेकं कुर्वन् नृपो निर्धनो रोगी च भवेत्। यदि पापग्रहाश्चतुर्थे सप्तमस्थाने वा स्थितास्तदा पदच्युतः स्यात्। यदि पापग्रहाः पञ्चमभावे स्थितास्तदा सर्वसुखविहीनः स्यात्। यदि पापग्रहा दशमभावे स्थितास्तदा भ्रष्टोत्सुकः स्यात्। यदि पापग्रहा अष्टमभावे स्थितास्तदाल्पायुः स्यात्। यदि पापग्रहाः तृतीयभावे स्थितास्तदा पराक्रमी स्यात्। यदि बली चन्द्रमा लग्नतो द्वादश-अष्टम-षष्ठस्थाने वा स्थितस्तदा नृपं हन्ति। यदि राजाभिषेकवेलायां केन्द्र(१,४,७,१०)-त्रिकोण(५,९)-त्रि(३)-धन(२) -आय(११)स्थाने शुभग्रहाः, त्रि(३)-षष्ठ(६)-लाभ(११) - अरिगते(६) वा स्थाने पापग्रहाः स्थितास्तथा चन्द्रमाः षष्ठ-अष्टम-द्वादशस्थानविवर्जितेऽन्यस्थाने स्थितः, तदा राज्ञां राजाभिषेकः शुभः स्यात्। यस्य नृपस्य राजाभिषेकसमये गुरुर्लग्ने त्रिकोणे वा स्थितः, भौमः षष्ठस्थाने, तथा शुक्रो दशमस्थाने संस्थितः, तदा नृपो विक्रमेण राज्यलक्ष्मीं प्राप्नोति। यस्य नृपस्य राज्याभिषेकसमये शनिस्तृतीय-षष्ठ-एकादशस्थानविवर्जितेऽन्यस्थाने स्थितः, गुरुर्दशमस्थाने स्थितस्तथा बुधश्चतुर्थस्थाने स्थितः, तदा स योगो नृपं चिरायुषं करोति। तथा तस्य पदं स्थिरं स्यात्। शुभग्रहाणां युतश्चन्द्रमाः, स्वयोगेषु शुभेषु च यस्य नृपस्य राज्याभिषेको भवति, सोऽभिषिक्तः क्षितीश्वरो राजयोगी स्यात्।[१०५]

राज्याभिषेकसमये, राजभवनस्य प्राग्भागे गोमयेन चतुरस्रमण्डलं वर्णकैः समलङ्कृतं कारयेत्। तत्र गङ्गातोयसुसम्पूर्णस्वर्णकुम्भोदकैः सह सुमनोहरभद्रासनं सम्यगर्चयेत्। दिग्विदिक्षु स्थितैः श्वेतगन्धमाल्याम्बरार्चितैः शतौषधी-मूल-स्वर्णरत्न-सद्बीजपल्लवैर्मृत्तिका-वृषशृङ्ग-गजदन्तरोचना-रोचना-उत्पल-पद्मक-पद्म-मुस्तरेणु- कुङ्कुम-राजसर्षप-मुस्त-देवदारुसमन्वितैर्देवस्य त्वे त्वायुःपुष्टियशस्करैर्मन्त्रैरब्लिगैर्वेद- मन्त्रैश्च शुभलग्ने शुभग्रहैर्युते भद्रासने नृपस्य राजाभिषेकं कारयेत्। शङ्ख-मृदङ्गादिध्वनिद्वारा नीराजनं च कर्तव्यम्। तथा

१०५ व.सं. अ.३३ श्लो. १ तः ११

चाशिषो वाचनं कृत्वा देवान् पितॄन् अर्चयेत्। श्वेतमाल्यो वस्त्रधारी प्राङ्मुखस्थितस्य राज्ञ आयुधानि पट्टं च विप्रान्गन्धादिना पूजयेत्। ब्राह्मणद्वारा नृपस्य शिरसि पट्टं बध्नीयात्। सिंहासनगतो नृपो मन्त्रपूर्वमानयेत्, विप्रेभ्यो दक्षिणां च दद्यात्। पूर्वदिशि सम्मुखं मुखं कृत्वा राजा ब्रूयात् - हे धरे , अहं त्वां नमामि। धन-तेजः-श्री-अर्थे प्राच्यां दिशि मामभिषिञ्चतु। हे रुद्र, विजयप्राप्ति-अर्थे दक्षिणदिशि मामभिषिञ्चतु। हे आदित्य, वृद्धि-अर्थे पश्चिमदिशि मामभिषिञ्चतु। हे विश्वेदेवाः संतुष्टि-अर्थ उत्तरदिशि मामभिषिञ्चन्तु। हे दिक्पालाः सदा विजयाय मामभिषिञ्चन्तु। नवालङ्कारभूषितं व्याघ्रचर्मणोपर्युपविशतः साम्राज्यमिति मन्त्रेण राजानं सम्यक् पूजयेत्। छत्रचामरसंयुक्तः, राज्यचिह्नसमन्वितो राजा पुरोहितद्वारा प्रयत्नतः सावित्र्याग्न्यौ जुहुयात्। विद्वत्-पुरोहित-अमात्य-वृद्ध-बन्धुसमन्वितैरुदुम्बरसमिद्भिश्चाज्येना-ष्टोत्तरशतं मन्त्रैर्जुहुयात्। तदा नृपस्य सप्ताङ्गं संचिन्त्य, सम्यग्विचार्य, प्रजाधर्मपालनं यो राजा करोति, स चिरं वृद्धिं प्राप्नोति। इति अभिषेकविधिमुक्त्वा, अभिषेकगुणोपेतं, धर्मशीलिनं राजानं तस्याचरणं कथयेत्। श्रीमान्, कुलीनः, व्यसनरहितः, अतिशूरः, वेदज्ञाता, स्मृतिमान्, सुदक्षः, धर्मस्वरूपी, रोगरहितः, अलुब्धः, पवित्रः स्थिरः, नीतिमान्, सुन्दरः, पथ्याभिलाषी, निपुणः कलासु, वक्ता, सुन्दरवेषधारी, प्रियवाक्, कृतज्ञः, वृद्धोपसेवी, गुणवान्, गम्भीरः, स्वरन्ध्रगोप्ता, पररन्ध्रवेत्ता, दानी, सहनशीलः, विजितेन्द्रियः, मानी, सुसप्ताङ्गयुतः, नम्रः, उत्साही, मन्त्रप्रभुशक्तियुक्तः, चतुर्विधोपाययुतः, अभीतः (निर्भीकः)- एतद्धर्मशीलिनो राज्ञ आचरणं कथितम्।[१०६]

पञ्चाङ्गमन्त्रैः कुशलः, प्रगल्भः, षड्गुणवृन्दः -एतैर्गुणैर्युतो राजा सदा विजयी भवेत्। पञ्चाङ्गमन्त्राणां तथा षड्गुणानां नामानि पृथक् पृथक् कथितानि। आद्योपायः सुप्रारम्भः(१), धनप्राप्तिः(२), गुणपूर्णता(३), देशकालस्य विभागज्ञाता(४), विनम्रः(५) तथा च

---

१०६ व.सं. अ.३३ श्लो. १२ तः ३१

सर्वकार्येषु सिद्धिः- एतानि पञ्चाङ्गसंज्ञकमन्त्राणि कथ्यन्ते। साम-भेद-दान-दण्डानि- एते चतुर्विधोपायाः कथ्यन्ते। सन्धि-विग्रह-यान-द्वैधी-भावसमन्वित-संश्रय- इति नीतिज्ञैः षड्गुणाः परिकीर्तिताः। एवं सम्पूर्णलक्षणयुतः, सेव्यसेवकसज्जनैः, वृद्धः, विद्वज्जनामात्यैः सदा परिसेवितः। एतैः सप्तभिः सर्वप्रकारकमुन्नतिकारकः स्यात्, अत आत्मनो हितं चिन्तयेत्। उत्तमनृपो गीततूर्यरवैः सार्धं शय्यां त्यजेत्। गृहान्निर्गत्य मङ्गलवाक्यानि शृण्वन् गौ-सुवर्ण-अग्नि-द्विज-घृत-जल-सूर्य-धराधिपान् वीक्षयेत्। ततः मूत्रपुरीषे उदङ्मुखाः मौनी कुर्यात्। गन्धलेपक्षयकरं शौचं विधानतः कुर्यात्। पूर्वदिश्युत्तरदिशि वा मुखस्थितो भूत्वा वितस्तिदीर्घकाष्ठेन, सत्त्वगपाटितेन दन्तधवनमाचरेत्। शिरीष-लोध्र-पनस-निम्ब-जम्बू-कन्द-बक-कुटज-अङ्कोल-बकुलैर्दन्तधावनं सदा लक्ष्मीवृद्धिकारकं भवेत्। भाण्डीर-करवीर-आम्ल-दाडिम-करञ्ज-कोविदार-आर्कैः सदान्नवृद्धिर्भवेत्। अपामार्ग-वट-प्लक्ष-खादिर-औदुम्बर-अर्जुन-बिल्व-पुन्नाग-ककुभैः सदा स्थिरायुर्वृद्धिर्भवेत्। श्रीखण्ड-चम्पक-अम्बष्ठ-नारिकेल-विभीतक-कङ्कुष्ठ-शाम-नारङ्ग-निचुलैरतुलं यशः प्राप्नोति। पलाश-अश्वत्थ-जम्बीर-मातुलुङ्ग-कुलाम्बक-अगस्ति-ताल-हिन्तालक-कङ्काष्ठवृक्षैर्निर्धनतां प्राप्नोति। तन्त्रीणक-शमी-वेणु-मधु-आमलक-वञ्जुल-विकङ्कत-व्याघ्रपाद-सर्जकृष्णवृक्षा यशःक्षयं कुर्वन्ति। हरीतकी-विष्ठीनाग-केतकी-उद्दाल-तापस-कार्पास-आटकि-वागूची-बला-श्लेष्मान्तकवृक्षै रोगो भवेत्। भल्लातक-देवदारु-मर्दयन्ती-बालक-इक्षु-त्रिणाङ्कुल-अश्म-लोहादिकारणेन मार्गेऽवरोधस्तथा शत्रुभयः स्यात्। हरिकथालापं शृण्वन् सन्ध्यादिनियमानामाचरणं कुर्यात्। सुवर्णसहितां देव- द्विज-गुरुभ्यो वत्ससंयुतां गा दद्यात्। तेषां तिथिश्रवणपूर्वकं स्वस्तिवाचनं लब्ध्वा तथा च भिषजां वचांसि शृण्वन् तनुःस्थितेः सम्यग्ज्ञानं प्राप्नुयात्। श्वेतमालां श्वेतवस्त्रं धारयित्वा सम्पूर्णाभूषणेन सुशोभितः, विनम्रभृत्यस्तथाप्तैः परिवारितः, काव्यज्ञाता, मन्त्री तथा च नैयायिकैः सह सभामध्ये प्रवेशं

कृत्वा राज्याभिवृद्धि -अर्थे धर्मं चिन्तयेत्। ततः पुनर्माध्याह्निकं कृत्यं समाप्य ग्रसनपूर्वकं पुत्राद्यैः सह भुञ्जीत। भगवतः शङ्करस्य तथा विष्णोर्गाथां शृण्वन् इष्टालापांश्च निर्वर्त्य गजाश्वादीन् ईक्षेत। सायं-सन्ध्यादिकं कर्म कृत्वा सभायां पूर्ववत् प्रविश्य ततो नृपो विलासिनी पट्टराणीसमवेतः सन्ध्याबलिक्रियां सम्पन्नां कुर्यात्। तैजसेषु पात्रेषु तद्राज्यानुसारेण नैकस्मिन्नथ, त्रिषु, पञ्चसु सप्तस्वष्टदलपदमान्यैर्विचित्रितैस्तत्तद्दलेषु कर्णिकायां च बहुदीपैरुज्ज्वलैः कुर्यात्। रक्षामन्त्रैः, मङ्गलपाठकैः सह नीराजनं कृत्वा पुनः पूर्ववद्राज्यस्य हितं चिन्तयेत् गुप्तचारकान् प्रेषयेत्। नियमपूर्वकानामङ्गरक्षकानां मनोरथान् पूरयित्वा पूर्ववदाचरणानामनुसरणं कृत्वान्तःपुरं संप्रविशेत्। एवं समाचरन् सदा नित्यं सततं कीर्तिमाप्नुयात्, तस्मात् सर्वप्रयत्नेन राज्यं धर्मेण पालयेत्।[१०७]

## १.४.११ संक्रान्तिः —-

वृद्धवसिष्ठसंहिताग्रन्थ एकोनविंशाध्याये संक्रान्तिनामक एकत्रिंशत् (३१) श्लोकाः सम्मिलिताः।

यन्मासे सूर्यस्य संक्रमणं रवि-शनि-भौमवासरे वा स्यात्, तदा तन्मासे पित्तकफवायोत्पन्ना रोगा जायन्ते। अवृष्टिस्तथा नृपाणां मध्ये कलहो जायते। यन्मासे सूर्यस्य संक्रमणं बुध-गुरु-शुक्र-सोमवासरे वा स्यात्, तदा तन्मासे नृणामारोग्यं स्यात्। नृपाणां क्षेमं, सस्यविवृद्धिस्तथा च विधर्मीनां मरणं भवेत्। सूर्यस्य संक्रमणकाले यदि उग्रसंज्ञकनक्षत्राणि( पूर्वाफाल्गुनी-पूर्वाषाढा-पूर्वाभाद्रपदा-भरणी-मघा) स्युः, तदा होरानामा संक्रान्तिर्भवति। सूर्यस्य संक्रमणकाले यदि लघुसंज्ञकनक्षत्राणि( हस्तम्-अश्विनी-

---

१०७ व.सं. अ.३३ श्लो. ३२ तः ६०

पुष्यम्-अभिजित्) स्युः, तदा ध्वांक्षीनामा संक्रान्तिर्भवति। सूर्यस्य संक्रमणकाले यदि चरसंज्ञकनक्षत्राणि(स्वाती-पुनर्वसुः-श्रवणं-धनिष्ठा-शतभिषा) स्युः, तदा महोदरीनामा संक्रान्तिर्भवति। सूर्यस्य संक्रमणकाले यदि मृदुसंज्ञकनक्षत्राणि(मृगशीर्ष-चित्रा-अनुराधा-रेवती) स्युः, तदा मन्दाकिनीनामा संक्रान्तिर्भवति। सूर्यस्य संक्रमणकाले यदि स्थिरध्रुवसंज्ञकनक्षत्राणि(उत्तराफाल्गुनी-उत्तराषाढा-उत्तराभाद्रपद-रोहिणी) स्युः, तदा मन्दानामा संक्रान्तिर्भवति। सूर्यस्य संक्रमणकाले यदि मिश्रसंज्ञकनक्षत्राणि(कृत्तिका-विशाखा) स्युः, तदा मिश्रा नामा संक्रान्तिर्भवति। सूर्यस्य संक्रमणकाले यदि तीक्ष्णसंज्ञकनक्षत्राणि(मूलं-ज्येष्ठा-आर्द्रा-आश्लेषा) स्युः, तदा राक्षसीनामा संक्रान्तिर्भवति। शूद्र-वैश्य-चौर-नृप-द्विज-पशूनां तथा सर्वेषां प्राणिनां कृते होरादिसंक्रान्तयः शुभफलदाः स्युः।[१०८]

यदि सूर्यस्य संक्रमणं नाग-चतुष्पद-तैतिल-करणे भवेत्, तदा सुप्तसंज्ञा तथा कौलव-शकुनि-किंस्तुघ्नकरणेषु सूर्यस्य संक्रान्तिरूर्ध्वस्थिता कथ्यते। यदि सूर्यस्य संक्रमणं गर-बव-विष्टि-वणिज-बालवकरणेषु भवेत्, तदा संसारे सदैव वृष्टिः, धनधान्यसम्पन्नता तथा विशेषतः क्षेमं भवति। एतत्संक्रान्तिफलं क्रमेणानिष्ट-इष्ट-मध्यमरूपेणातुलफलदं स्यात्। शिशोरेवं गर्भस्थबालकानां नानाविधरोगैः पीडयेत् ।[१०९]

सूर्यसंक्रान्तिः यदि पूर्वाह्णे भवेत्, तदा नृपतिभयं भवेत्। सूर्यसंक्रान्तिर्यदि मध्याह्ने भवेत्, तदाखिलनृपान् नाशयति। सूर्यसंक्रान्तिर्यद्यपराह्णे भवेत्, तदा वैश्यान् नाशयति। सूर्यसंक्रान्तिर्यदि सूर्यास्ते भवेत्, तदा अखिलान् शूद्रान् नाशयति। सूर्यसंक्रान्तिर्यदि सन्ध्यासमये भवेत्, तदा पिशाचगणान् नाशयति। सूर्यसंक्रान्तिर्यदि रात्रिसमये भवेत्, तदा

---

१०८ व.सं. अ.१९ श्लो. १ तः ४

१०९ व.सं. अ.१९ श्लो. ५,६,७

निशाचरान् नाशयति। सूर्यसंक्रान्तिर्यदि रात्रावुत्तरार्धभागे भवेत्, तदा नटनर्तकान् नाशयति। सूर्यसंक्रान्तिर्यद्युष:कालसमये भवेत्, तदाखिलान् पशुपालकान् गोपालान् हन्ति। केवलं सन्ध्यासमये ब्रह्मचारिण एवं संन्यासिनो नाशयति। तथा चानुक्तकाले संक्रान्तिर्भवेत्, तदा नृणां सततं शुभफलं भवति। सूर्यस्य राशौ संक्रमणं पूर्वे षोडशनाड्यस्तथा च परतः षोडशनाड्य: पुण्यकाल: कथ्यते। तस्मिन्काले सर्वत्र स्नानदानयो: पुण्यप्रद: काल:। यदि दिने सूर्यस्य संक्रमणं, तदा दिन एव पुण्यकार्येषु पुण्यं लभ्यते। यदि रात्र्यर्धे प्राक्समये संक्रान्ति:, तदा पूर्वाह्णे स्नानदानयो: पुण्यं लभ्यते। यदि रात्र्यर्धे पश्चात्समये संक्रान्ति:, तदापरदिनं पुण्यप्रदम्। यदि निशायां संक्रान्ति:, तदा दिनद्वयं स्नानदानयो: पुण्यप्रदम्।[११०]

स्थिरराशिषु(वृषभ-सिंह-वृश्चिक-कुम्भेषु) संक्रान्तिर्भवेत्, तदा सा विष्णुपदीनाम्ना ख्याता। द्विस्वभावराशिषु(मिथुन-कन्या-धनु-मीनेषु) संक्रान्ति: भवेत्, तदा सा षडशीतिमुखनाम्ना ख्याता। मकर-कर्कसंक्रान्त्यावयनसंक्रान्तिनाम्ना ख्याता। तत्र मकरराशौ सूर्यस्य संक्रमणमुत्तरायण:, तथा कर्कराशौ सूर्यस्य संक्रमणं दक्षिणायन: कथ्यते। मेषतुलासंक्रान्त्यौ विषुवत्संक्रान्ति: प्रकीर्तिता। एतत्प्रकारेण द्वादशसंक्रान्त्योर्मध्ये संक्रान्तिचतुष्टयं विशेषेण कथ्यते। विष्णुपदीदक्षिणायनसंक्रान्तिकाले स्नानदानयो: पुण्यं दिने लभ्यते। षडशीतिमुख-उत्तरायणसंक्रान्तिकालो यदि रात्रौ भवेत्, तदा परदिनं पुण्यकाल:। एवं विचिन्त्य दैवज्ञ: सदैव सम्यग्वदेत्। यदि विषुव-अयनसंक्रान्तिकाले ग्रहणं तथा पुण्यदिवसे श्राद्धादिकर्म न भवति, तदा सदा पितर: शापं दत्त्वा व्रजन्ति। आगतसमये य: कोऽपि दानजपहोमादिकं न कुर्यात्, ऊषरवाप्तबीजं तद्वत् तच्च निष्फलं भवति। पुत्रजन्मसमये, संक्रान्तिकाले वा यदि चन्द्रसूर्ययोर्ग्रहणं तदा रात्रावपि नृभिर्विशेषत: स्नानं दानं कर्तव्यम्। मेष-कन्या-वृषभ-कर्कसंक्रान्तिकाले यदि वर्षा भवेत्, तदात्यधिककल्याणं, सुभिक्षं तथा

११० व.सं. अ.१९ श्लो. ८ त: १३

नृपसज्जनगोकुलानां क्षेमं भवति। मीन–धनु–सिंह–मिथुन–संक्रान्तिकाले यदि वर्षा भवेत्, तदा अवृष्टिः, रोगः, डामरमेवं नृपाणां मध्ये युद्धभयं भवेत्। कुम्भ–तुला–वृश्चिक–मकर–संक्रान्तिकाले यदि वर्षा भवेत्, तदाग्निभयं, रोगः, विस्फोटः, तस्करपीडा तथावृष्टिर्भवेत्।[१११] सिंहः–शार्दूलः–वराहः–गर्दभः–गजः–महिषः–अश्वः–श्वा–अजः–वृषभः–कुक्कुटः –इति क्रमेण बवादिकरणतः संक्रान्तिवाहनानि कथितानि। बाह्लीक–खश–वङ्ग–अङ्गादि देशेषु नक्षत्रोत्पन्नानि संक्रान्तिवाहनानि ज्ञेयानि। करणोत्पन्नानि संक्रान्तिवाहनान्यन्यदेशेषु ज्ञेयानि। बवादिकरणे यदि संक्रान्तिर्भवेत्, तदा क्रमेणास्त्र–शस्त्रधारणकर्त्री स्यात्। यथा भुशुण्डी–गदा–खड्ग–दण्डः– कार्मुकम्–तोमरम्–कुन्तः–पाशः–अंकुश एवं शरः। चन्द्रबलानुसारेण सूर्यसंक्रमणं नृणां तस्मिन्मासे गौडमतानुसारेण तत्फलं ददाति। यस्य जातकस्य जन्मनक्षत्र–मास–तिथि –आदिदिने संक्रान्तिर्भवेत्, तदा स मासपर्यन्तं हानिफलं प्राप्नोति। जन्मनक्षत्रतस्त्रिनक्षत्रान्तर्गता तदा यात्रा, पुनर्नक्षत्रद्वयान्तर्गता, तदा सुखं तत्पश्चात् त्रिनक्षत्रान्तर्गता, तदाल्पदुःखं, पुनः षण्नक्षत्रान्तर्गता, तदा वस्त्रलाभः। तदनन्तरं त्रिनक्षत्रान्तर्गता तदा हानिः, तथा चानन्तरं पुनः षण्नक्षत्रान्तर्गता, तदाधिकधनलाभो भवेत्। सूर्यनक्षत्रतस्त्रयनक्षत्रान्तर्गतो यदि चन्द्रमाः स्यात्, तदा निर्जीवसंज्ञकः स्यात्। तस्मादेकादशनक्षत्रं मङ्गलप्रदं तथा चानन्तरविंशतिनक्षत्राणां मृत्युदायकसंज्ञा भवेत्। सूर्यदोषशान्तिरेवं निर्जीवसंज्ञकदोषशान्तिहेतोर्द्विजानां स्वर्णशूलं तिल–वस्त्रसमन्वितं दद्यात्। सूर्यबिम्बं नित्यगमनेन भचक्रं चरेत् तथायनादस्तोदय उच्च–नीच–समानकक्षायां स्थितः। तदंशे न्यूनकाले वर्तमानस्य निर्गमं तथा परराशिप्रवेशं च विजानीयात्।[११२]

१११ व.सं. अ.१९ श्लो. १४ तः २२
११२ व.सं. अ.१९ श्लो. २३ तः ३१

## १.४.१२ ग्रहणशान्तिः —-

वृद्धवसिष्ठसंहिताग्रन्थे षट्त्रिंशदध्याये ग्रहणशान्तिनामके चतुर्विंशति(२४)श्लोकाः सम्मिलिताः ।

यस्य जन्मनक्षत्रे सूर्यचन्द्रयोर्ग्रहणं भवेत्, तस्य घोरव्याधिभयं धनक्षयश्च भवेत्। अतो दोषशान्त्यर्थं द्रव्यमन्त्रविधानेन सम्यगुपरागस्नानविधिं कुर्यात्। गोमयेन चतुरस्रमण्डलं विलेप्य गृहस्येशानभागेऽनेकवर्णेन समलंकृतं पुनस्तत्र चतुःकुम्भान् स्थापयेत्। तान् सागरात्मककुम्भान् सम्पूर्णदेवानां तथा सम्पूर्णतीर्थानां शुभानां स्मरणं कृत्वानन्तरं सागरात्मककुम्भान् पञ्चत्वक्पल्लवोशीरशतौषधिसमन्वितान् मृत्तिका–रत्न–सुवर्ण–गजदन्त–गुग्गुलचन्दनैर्युतान् पञ्चगव्यामृतभ्राजत्स्फटिकैः सर्षपवरैः शङ्खकुङ्कुमतीर्थाम्बुरोचनैः पद्मकैर्युतान्कुर्यात्। चत्वारः प्राङ्मुखा विप्राः पृथक् पृथक् प्रार्थयेत्, स्वस्तिवाचनं कृत्वा, अब्लिङ्गैर्वारुणैः सूक्तैस्तिलहोमं व्याहृतिभिः सहस्रं चाष्टसंयुतमेव कृत्वा प्रयत्नेन स्नानकर्म समाचरेत्। अनन्तरं संकल्पपूर्वकं नवभिर्मन्त्रैरामन्त्र्य तान् मन्त्रान् स्वर्णपट्टे लिखेत्। तान् कर्तुः शिरसि बद्ध्वा अब्लिङ्गैर्वेदमन्त्रकक्षः सुमन्त्रितैः कुम्भजलैः स्नाप्य नीराजयेत्। पवित्रश्वेतवस्त्रमालादिकं धारयेत्, ग्रहज्ञेभ्यस्तथा ऋत्विग्भ्यः स्वशक्त्यानुसारं वस्त्रदक्षिणादिकं दद्यात्। वज्रं धारयेत्। सहस्राक्ष आदित्यानां स्वामी इन्द्रो ग्रहपीडां व्यपोहतु। सप्तहस्तवान् त्रिपादैर्युतश्चतुःशृङ्गयुतस्तथा च मेषवाहनः स अग्निश्चन्द्रग्रहणोत्पन्नां ग्रहपीडां व्यपोहतु। यः सर्वदेवानां मुखं तथा च सप्तकिरणैर्युतोऽमितप्रकाशः सोऽग्निदेवो मम ग्रहपीडां व्यपोहतु। यो जनानां कर्मसाक्षी धर्मराजस्तथा महिषवाहनः स चन्द्रग्रहणोत्पन्नां यमो मम ग्रहपीडां व्यपोहतु। राक्षसगणानां स्वामी, साक्षात्प्रलयकारी, अग्निकान्तिसमः, खड्गशरादियुक्तो दीर्घकायो रक्षोदेवो मम पीडां व्यपोहतु। नागपाशधरो देवो मकरवाहनः स जलाधिपतिः साक्षाद् रूपेण मम ग्रहपीडां व्यपोहतु। प्राणरूपो यो

लोकान्याति कृष्णमृगप्रियः स वायुदेवश्चन्द्रग्रहणोत्पन्नां मम ग्रहपीडां व्यपोहतु। यो धनाधिपः खड्ग-शूल-गदाधारी स कुबेरो चन्द्रग्रहणोत्पन्नं मम पापरूपिणीं पीडां व्यपोहतु। चन्द्रधारी, पिनाकी, वृषवाहनः स शङ्करश्चन्द्रग्रहणोत्पन्नां मम पापं नाशयतु। यानि चराणि स्थावराणि भूतानि त्रैलोक्ये भवन्ति, तैः सर्वैः ब्रह्माविष्णुसूर्यादीभिर्युक्ताः, अतस्तैर्मम पापं दहतु। एतैर्नवमन्त्रैः पितृदेवयोर्गौ-पृथ्वी-स्वर्ण-वस्त्रादिद्वारा पूजनं कारयेत्। ग्रन्थोक्तैस्त्वेतैर्मन्त्रैरावाहनं कृत्वार्चयेत्। यत्नादनेन विधिना ग्रहस्नानं समाचरेत्, तेन तस्य ग्रहपीडा न भवति। तथा च बन्धुक्षयो धनक्षयो न भवेत्। स जातकः परमां सिद्धिमाप्नोति। तस्य पुनरावृत्तिर्दुर्लभा स्यात्। सूर्यग्रहणेऽप्येवमेव सूर्यनाम्ना शान्तिकर्मविधिः कर्तव्यः।[११३]

### १.४.१३ उत्पातः —

वृद्धवसिष्ठसंहिताग्रन्थे पञ्चचत्वारिंशदध्याय उत्पातनामके शताधिकत्रयनवति(१९३) श्लोकाः सम्मिलिताः। प्रकृतेरन्यत्वमुत्पातः कथ्यते, अर्थाद् विपरीत उत्पातसंज्ञा कथिता। भूमिजन्यः, अन्तरिक्षजस्तथा च दिव्यः- एते त्रिविधा उत्पाताः स्युः। यत्समये मनुष्या अतिमात्रेण पापकर्मणि रताः, तदा पापवृद्धिकारणादुपद्रवाः सम्भवन्ति। एते उपद्रवा उत्पातसंज्ञकाः। अधर्मेण, असत्येन, नास्तिक्यादतिलोभतः, अनाचारान् नृणां नित्यमुपद्रवाः प्रजायन्ते। तद्वशाद् शोकदुःखदाः त्रिविधा उत्पाताः संभवन्ति। दिव्यान्तरिक्षक्षितिजा विकारा घोररूपिणो विकाराः कथ्यन्ते। ग्रहनक्षत्रोत्पन्नास्तथा च केतुजाश्चोत्पाता दिव्यसंज्ञकाः कथ्यन्ते। अर्थात् सूर्यादिग्रहाणां तथाश्विन्यादिनक्षत्राणां विकारयुक्तकारणेन य उत्पाता भवेयुः, ते दिव्यसंज्ञका उत्पाताः कथ्यन्ते। निर्घातपरिवेषोल्कापुरन्दरधनुर्ध्वजा लोहितैरावतोष्ट्राश्च कबन्धपरिघादयो महोत्पाता अन्तरिक्षा उत्पाताः कथ्यन्ते। ये स्थावरे वा जङ्गमे क्षितावुत्पद्यन्ते

---

११३ व.सं. अ.३६ श्लो. १ तः २४

त एकदेशिका भौमा उत्पाताः परिकीर्तिताः। भौमात्पातस्तुच्छः, अर्थात्स्वल्पफलदः, अन्तरिक्षा उत्पाताः मध्यमफलदाः, तथा दिव्या उत्पाता वर्षादर्धतः, तदर्धतः फलदाः स्युः। भूमिसम्बन्धिन उत्पाताः शान्तिविधिं कुर्वन् शमं यान्ति। य अन्तरिक्षा उत्पातास्ते मार्दवं यान्ति। किन्तु दिव्या उत्पाता होमान्नगोभूमिदानैस्तत्कोटिहोमतो महोपहाराद् रुद्रस्य गोदोहात्तत्पुरःसरमलंकृते क्षितितले यावत्क्षीरे प्लवो भवेत्, दिव्या उत्पाता अपि शमं यान्ति। तथा भूमि–अन्तरिक्षा उत्पाता अपि शमं यान्ति। शान्तिकमकृत्वा नृपो दुःखरूपिणि समुद्रे निमज्जति। नगरे, ग्रामे, कोषे, वाहनेषु, पुरोहिते तथा च स्त्री–पुत्र–आत्मनि – एतैरष्टप्रकारकैर्दैवोत्पातै राजा पीडितो भवति।[११४]

यज्ञियैर्वृक्षैरथवा वनदारुभिश्चतुरस्त्रं समन्ततो हस्तैः षोडशभिर्मण्डपं कार्यम्। चतुर्द्वारसमायुक्तं तोरणाद्यैरलंकृतं तन्मध्ये हस्तैश्चतुर्भिः समन्ततः कुण्डं कार्यम्। तत्र चतुर्हस्तं खातं कृत्वा, वप्रत्रयसमन्वितं, षडङ्गुलोन्नतस्त्वाद्यो द्वादशाङ्गुलविस्तृतो दशाङ्गुलोन्नतो मध्ये ह्यष्टाङ्गुलसुविस्तृतश्चतुर्दशाङ्गुलोत्सेधश्चतुरङ्गुलविस्तृतस्तृतीयवप्रः कर्तव्यः। योनिश्चैका तु पश्चिमे चतुर्दशाङ्गुलैर्दीर्घा चोन्नता षोडशाङ्गुलैर्हीनाधिका न कर्तव्या। षड्भिरङ्गुलैस्तस्य विस्तार एककुण्डस्य लक्षणं ज्ञेयम्। सार्धहस्तप्रमाणेनेशानकोणे वेदिकानिर्माणं कार्यम्। वेदिकोन्नता विस्तृता, प्रागुदक्प्रवणा शुभा कार्या। सर्वप्रथमं सर्वदेवमय्यां वेदिकायां शिवपूजापुरःसरं ततः पूर्वोक्तविधिना तत्र तान् ग्रहान् अर्चयेत्। पलाशसमिदाज्यान्नैर्मुखान्तेऽष्टशतं पृथगघोरमन्त्रेण ततो ग्रहहोमं च कारयेत्। तिलहोमं व्याहृतिभिः। जापकैः स्वस्ववेदपारायणं द्वारा जुहुयात्। चमकं नमकं सूक्तं पुरुषोक्ताङ्गजापकैः होमं नवभिराचार्यैः सह तद् ब्रह्मणा कार्यं कुर्यात्। ततः शिवविष्णोः कथालापैर्दिनशेषं नयेत्। एवं यावत्कोटिहोमस्तावत्कार्यमतन्द्रिभिः। नैवेद्यान्ते ततः पश्चाच्छान्तिपूर्वकं ब्राह्मणान्भोजयेत्। पश्चात्स्वयं बन्धुभिर्भुञ्जेत्। तर्धं वा तर्धं वा

---

११४ व.सं. अ.४५ श्लो. १ तः ११

लक्षहोमं दोषानुसारेण वित्तशाठ्यविवर्जितं कुर्यात्। होमान्ते चतुर्विंशति–ऋत्विजान् दक्षिणां दद्यात्, प्रतिद्विजं सार्धनिष्कशतद्वयं तथा चालङ्कारेण सन्मानं कुर्यात्। एवमेव यशःकामनामिच्छन् नृपो भक्तितस्तर्धं वा तर्धं वा दोषानुसारेण धनं दत्त्वा यज्ञं कुर्यात्। आयुषमिच्छन् मनुजो व्रीहिभिस्तथा च सर्वकामनामिच्छन् मनुजस्तिलैश्च जुहुयात्। इति साधारणशान्तिकर्म कथितम्। उत्पातानामेवं शान्तिकर्म पृथक् पृथक् कथितम्। तेषां भक्तिपूर्वकं समन्त्रद्रव्यमनुष्ठानं कार्यम्। यद्वार्चाः प्रनृत्यन्ति, पतन्ति, चलन्ति, हसन्ति, रोदन्ति, पचन्ति, जल्पन्ति, चेष्टयन्ति, स्थानान्तरं वाप्यथवा व्रजन्ति, वमन्ति, धूमानलरक्ततोयस्नेहदधिक्षीरसुराक्षतादिकमङ्गारकार्पासतुषास्थिरोमकबन्धपाषाणकरोदनादिकं– एवमाद्या विकाराः प्रतिमासु च दृश्यन्ते, तदा राज्ञो, जनपदस्य च नाशाय भवन्ति। ऋषिब्रह्मजः पितॄनजो द्विजानामेव, वैकृतं शिवोत्थं लोकपालोत्थं शिशूनां, नृपतेश्च तल्लोकानां विष्णुसम्भूतं, ग्रहोत्पन्नं पुरोहितानां, स्कन्दोत्पन्नं मण्डलीकानां, विशाखोक्तं क्षमाभुजां, गणेशोत्पन्नं नृपस्य, व्यासोत्थं भूपतेस्तथान्योत्थो विकारः सर्वदा लोकाभावाय स्यात्। उत्पातानां फलपाकोऽष्टमासैः, संवत्सरेण वा स्यात्। अतस्तेषामुत्पातानां शान्तिहेतोः प्रयत्नाः कथिताः। दैवविकारं दृश्येत्, तदा दिनत्रयपर्यन्तमुपवासं कृत्वा शुद्धमनाः शुद्धभावो जितेन्द्रियपुरोहितेन सह चतुर्थदिने शिवालयं गत्वा दीपैः संकल्पपूर्वकं सहस्रकलशस्नानं कुर्यात्। तदनन्तरं तल्लिङ्गमन्त्रैर्गन्धवस्त्रादिसहितं महादेवं समर्चयेत्। तथा च भक्तिपूर्वकं घृतोपहारवित्तान्नैरपि समर्चयेत्। ग्रहशान्त्यामुक्तकुण्डे पालाशसमिद्याज्यान्नैस्तल्लिङ्गैर्वेदमन्त्रकै– र्हुताशनं स्थापयेत्। अष्टोत्तरसहस्रं वा पृथगष्टोत्तरं शतं, तिलहोमादिकं सर्वशेषं पूर्ववदाचरेत्। नृत्यगीतादिभिः सह पञ्च, सप्त वा रात्रिपर्यन्तं जागरणं कुर्यात्। एवं सम्यक्कृत्वा तस्माद् दोषात्प्रमुच्यते। अनग्नौ ज्वाला दृश्यते तथा काष्ठयुक्तो न दीप्यते सन्धुक्षतोऽपि, नृपतेः पीडा जनपदस्य च। यस्मिन्नगरे जनपदे धूमोऽनग्नौ महद्रजः स्यात्, यदि दिनसमये वृक्षा

अन्धकारयुक्ता भवेयु:, रात्रौ व्यभ्रे नक्षत्राणामदर्शनं स्यात्, तथाग्नि: कान्तिरहित: स्यात्, तदा राजनाशो भवेत्। तथा तद्राष्ट्रस्य स्थानाधिपतिं दु:खशोकभयं करोति। शयनासनवस्त्राणां पादुकेभ्यो नृगात्रतो महिषाश्वगोहस्तिपशुकेशेषु गात्रतो धूमाग्निविस्फुलिङ्गा वा जलादिषु वा दृश्यन्ते, तदा राजराष्ट्रविनाश: स्यात् तथाग्निभयं शत्रुभयं भवेत्। यद्यायुधानि प्रज्वलन्ति कोशेभ्यो निर्गतानि, वेपमानानि जल्पन्त्यथ रुदन्ति वा हसन्ति वा तदा शीघ्रं तुमुलयुद्धं भवेत्। उक्तोत्पातानां विधानपूर्वकं शान्त्यर्थे रुद्रेण रुद्राभिषेकं कृत्वान्ते नैवेद्यै: प्रपूजयेत्। पूर्वोक्तलक्षणे कुण्डे हुताशनं स्थापयेत्। मुखान्तेऽष्टसहस्रमन्त्रैरग्निं जुहुयात्। तत: क्षीरवृक्षसमिद्भिश्च सर्षपैश्च पृथक् पृथक् तिलहोमं व्याहृतिभिरन्ते ब्राह्मणान् भोजयेत्। तथा ऋत्विग्भ्यो वित्तशाठ्यविवर्जितो दक्षिणां दद्यात्। एवंप्रकारेण भक्त्या य: कुरुते स तस्माद्दोषात्प्रमुच्यते। तथैकरात्रं, त्रिरात्रं वा शेषं पूर्ववदाचरेत्। यद्यकस्मादेव वृक्षाणां शाखाभङ्गो भवति, तदा शीघ्रं राष्ट्रभङ्गं वदेत्। यद्यकस्मादेव वृक्षा हसन्ति, तदा देशनाशो भवति। यद्यकस्मादेव वृक्षा रुदन्ति, तदा व्याधिभयं स्यात्। यद्यकस्मादेव वृक्षा: कम्पन्ते, ग्रामकम्पनं भवेत्। यद्यकस्मादेव वृक्षाद् विस्फुलिङ्गा अथवा धूम:, ज्वलिता वा तदा शीघ्रमग्निभयं स्यात्। यद्यकस्मादेव वृक्षाणां फलपुष्पोद्गमस्तदाग्निभयं स्यात्। बालवृक्षेषु पुष्पोद्गमे राष्ट्रविद्रावणं शिशुहानिर्भवेत्। बालवृक्षेषु क्षीरस्रवणे द्रव्यनाशो भवेत्। बालवृक्षेषु मद्ये वाहननाश: स्यात्। बालवृक्षेषु शोणिते युद्धमादिशेत्। बालवृक्षेषु स्नेहस्रावेऽनर्घभयं स्यात्। बालवृक्षेषु जलस्रावे महद्भयं स्यात्। बालवृक्षेषु क्षौद्रद्रावो भवेत्, तदा रोगशोकभयं भवेत्। शुष्कवृक्षेषु चाङ्कुरिते वृक्षस्य हानिस्तथानर्घता स्यात्।अकस्माच्छोषिते वृक्षे तदेव फलं ज्ञेयम्। यदि वृक्ष: स्वयं स्थाने पतति, तदा देवकृतभयं भवेत्। जल्पने, चलने वृक्षे राजराष्ट्रविनाशो भवति। अत: प्रयत्नतो यावच्छक्यं वृक्षस्याभिषेकं कृत्वा गन्धपुष्पमालावस्त्रच्छत्रोपहारकै: पूजनं कुर्यात्। तत्पश्चादष्टभिर्हस्तैश्चतुर्भिर्हस्तैर्वा प्रमाणेन

मण्डपस्य निर्माणं कुर्यात्। तन्मध्ये पूर्ववत् सम्यक्कुण्डं स्थापयेत्। ततो द्वादशवारं नमकेन, चमकेन रुद्राभिषेकं कुर्यात्। पुनरग्निसंस्थापनं कृत्वा मखान्ते चरुं जुहुयात्। रुद्राय स्वाहा - इत्यनेन मन्त्रेणासकृत्। ततो भक्तिपूर्वकं पृथगष्टशतं तिलव्याहतिभिर्जुहुयात्, ऋत्विग्भ्यो दक्षिणां दद्यात्, शेषं पूर्ववदाचरेत्। तथा भक्तिपूर्वकं विप्रान् घृतपायसभोजनैः सन्तोषयेत्। एवंप्रकारेण वृक्षजानामुत्पातानां शान्तिं प्रकल्पयेत्। तथा एवंप्रकारेण यः शान्तिं कुरुते स तस्माद् दोषात्प्रमुच्यते।[११५]

सर्वसस्यानामेकस्मिन् द्वित्रिसम्भवे तदा तद्दिक्स्वामिनः(नृपस्य) मरणं भवेत्। युग्मे पुष्पफले सति वृक्षस्य सुलतादीनामतिवृद्धिफलानि भवन्ति। यद्युक्तकाले तैलाधिक्यं हीनत्वं वा तिलेभ्यो भवेत्, तदा शत्रोरागमनमचिरान्नियमेन वा भवति। पशुनिर्वापणाच्छुचिः सस्यविकारैः विप्राय तत्क्षेत्रं दत्त्वा मन्त्रेण च चरुं हुत्वा तस्माद्दोषात्प्रमुच्यते। यद्यतिवृष्टावनावृष्टी भवेताम्, तदा क्षुधाभयं शत्रोर्भयं च स्यात्। वर्षर्तुं विहायान्यर्तुकाले यदि वृष्टिर्भवेत्, तदा रोगभयं स्यात्। वर्षा-ऋतुं विना वृष्टिर्भवेत्, तदा नृपस्य वधो भवेत्। शीतोष्ण-ऋतुषु विपर्ययात् संप्रवृत्तेषु-यदि ग्रीष्म-ऋतुकाले शीतमनुभवेत्, शैत्य-ऋतुकाले यद्युष्णमनुभवेद् वा तदा षण्मासाद् रोगदुःखतो राष्ट्रभीतिः स्यात्। अथवाकाले सप्ताहपर्यन्तं यदि सततं वृष्टिर्भवेत्, तदा नृपतेर्वधः स्यात्। यदि रक्तवृष्टिर्भवेत्, तदा रणोद्योगो- युद्धे तत्परः स्यात्। यदि मांसवृष्टिस्तदा महायुद्धं स्यात्। अस्थिवृष्टौ, वसावृष्टौ हि मरणं स्यात्। यदि क्षौद्रवृष्टिस्तदा राष्ट्रनाशः स्यात्। यद्यङ्गारैः, पांशुभिर्वृष्टिस्तदा राष्ट्रनाशो भवेत्। यदि धान्यकफलपुष्पाद्यैर्लोहैर्वृष्टिर्भवेत्, तदा महच्चौर्यभयं स्यात्। यदि पर्णैस्तृणैः काष्ठवर्षैस्तदेव फलं - महच्चौर्यभयं स्यात्। यदि पाषाणवृष्टिरभ्रेषु प्राणिवृष्टिरथापि वा तदापि तदेव महच्चौर्यभयं स्यात्। यदि चित्रविचित्रवृष्टिस्तदा सस्यानामीतिकारणं भवेत्। निर्मलाकाशे

११५ व.सं. अ.४५ श्लो. १२ तः ६७

सूर्यस्य छाया यदि न दृश्येत, अथवा दृश्यते प्रतीपा वा तदा क्षुधाभयमादिशेत्। सूर्यचन्द्रवायुपर्जन्यादीनां विकारजन्यकाल उत्पातकाले यज्ञकार्यं कुर्यात्। तथा पूर्ववत् स्वर्णगोदानै रत्नैर्दोषात्प्रमुच्यते। नगरसमीपस्था नदी यदि नगराद्दूरगा भवेत्, तदा सा तत्पुरं शून्यं कुरुते। यदि नासौ प्रतीपगा रक्तमांसकृमिस्नेहवाहिनी तदा शत्रुभयमाप्नोति। अशोषिते प्रवाहादौ शोषितेऽपि च तत्फलं स्यात्। गीतप्रलापनं, ज्वाला, धूमः, क्वाथो, रोदनम् – एवमादीनि कूपेषु जनानां निधनाय भवेयुः। अखाते सलिले जाते तथा कुण्डजलस्य परिवर्तने, अयं दोषः स्यात्। जलाशये विकारोत्पन्नस्तदा शत्रोर्भयं स्यात्। एते जलविकारा भवेयुः, तदा मन्त्रैः पूजाहोमं पूर्ववत् कुर्यात्, अरिष्टं शमं याति। हीनकालेऽधिके तस्य देशस्य कुलस्य च नाशः फलं प्राप्यते। हीनकालेऽधिके काले स्त्रीणां प्रसवे सति, असंख्यदिवसे युग्मप्रसवे चापि नाशनं स्यात्। अण्डजान्यमानुषानि बीजानि जायन्ते, हीनाङ्गास्त्वधिकाङ्गाश्चानङ्गा वा सम्भवन्ति, विशिरो, द्वित्रिशिरसो विमुखाः पक्षिसन्निभाः, तदा तस्य देशस्य, राष्ट्रस्य च विनाशं विनिर्दिशेत्। हस्तिनी वडवा गौर्वा युग्मं विजातिविकारं वा प्रसूयेत, तदा षड्भिर्मासैर्नृपक्षयो भवेत्। उष्ट्रमहिष्यो यदि युग्मं विजातिविकारं वा प्रसूयते, तदा कलहागमो भवेत्। अथोक्तानां च विकाराणां प्रयत्नतः शान्तिं कुर्यात्। ता नार्यः परदेशेषु त्यक्तव्याः। द्विजानन्नैः संतर्पयेद् ग्रहशान्तिं च कारयेत्। चतुष्पादश्च यूथेभ्यः परभूमिषु त्यक्तव्याः। यूथमन्यथा तु नगरस्वामिनं विनाशयेत्। तथा गोगजाश्वोष्ट्रमहिषनरपश्वादयश्चेद्वियोनौ रमन्ते, धेनुर्धेनुं पिबेदनड्वाननडुहं प्रति, श्वानो वापि पिबेद्धेनुं, धेनुः श्वानं वा –एवमादिविकारा येषां प्राणिनां प्रभवन्ति, तदा मासत्रयान्तरे परचक्रागमं वदेत्। विवासनं कृत्वा पूर्ववद् होमं, जपं कुर्वन्, प्राजापत्येन मन्त्रेण समिदाज्यचरुं क्रमात् हुत्वा, विप्रान् बहुसुवर्णं दद्यात्, सुभोजनेन तर्पयेत्। एवंप्रकारेण यः कुरुते सः तस्माद्दोषात्प्रमुच्यते।[११६]

---

११६ व.सं. अ.४५ श्लो. ६८ तः ९७

यो नास्तिको लोभाद् एवंप्रकारेण न कुर्यात्, स सर्वसंकटानश्नुते। यत्रारोहकं विना स्वयं वाहनं गच्छति, यद्यरोहके विद्यमाने वाहनं न व्रजेत्, यद्यकस्माद्रथचक्राणां पादभङ्गो भवेत्, तदा वत्सरतो भृशं परचक्रागमः स्यात्। अताडिते तूर्यनादस्ताडिते नादवर्जिते, तथा नानाविधनादास्तदा तद्राजराष्ट्रविनाशं करोति। तूर्यादिनादा नभसि श्रूयन्ते, निःस्वना वा तदा, परैरभिभवस्तथैव महद् रोगं सूचयति। यदि धेनुः स्वलाङ्गूलेन स्वतनुं सुवेष्टितां कुर्यात्,यदि नादाकारं शूर्पनिभो दर्वीरूपो मुसलोलूखलरूपो वा विकारो भवेत्, शृगालसदृशनादे, जल्पिते विकारे, शृगालस्य हसिते, रोदने वा शीघ्रं भयं भवति। अथवा राजनाशो भवति, तथाचिकित्सको रोगो भवेत्। वायव्योत्पन्नषूत्पातेषु शान्तिहेतोर्वायुदेवं पूजयेत्। शमीभिरत्र पूर्ववद् होमं कुर्यात्। आ वायो भूप इत्याद्याभिः पञ्चभिर्ऋग्भिः पूजयेत्। तथा बह्वन्नस्वर्णदानैश्च स दोषः शान्तिमाप्नुयात्। अकस्माद्यदि ग्रामपक्षिणो वने चरन्ति, अथवा वने विचरन् पक्षिणो ग्रामेषु निर्भयाद्वा विशन्ति, अथवा रात्रौ काकाश्च, दिवसे कौशिकादयो भवन्ति, शृगालो ग्रामं विशति, शशो रात्रौ विशति, मृगाः पक्षिगणा वापि चुक्रोशन्ति, सन्ध्ययोश्चुक्रोशन्ति, ग्रामस्य निकटे नूनं दीप्तायां कपोतो विशति, ग्राममारोहेद्वा गृहं विशेत्, तदा शत्रुभयः स्यात्। श्येनगृध्रादयः प्रदक्षिणक्रमेण व्योम्नि भ्रमन्ति, गृहस्य प्राङ्गणे हेमचक्षुःस्वरो भवेत्, एवमादिपक्षिणां विकाराश्चेद् भवन्ति, मधुवल्मीकजच्छत्रपत्राङ्कुरा गृहेषु यदि जायन्ते, तदा गृहकर्तृनाशं करोति। शवार्द्राङ्गं गृहीत्वा श्वा यदि वा मन्दिरं नयेत्, तदा तद्गृहस्वामिनः क्षिप्रं नाशं कारयेत्। अथवा युद्धे मृत्युर्भवेत्। मृगपक्षिविकारेषु होमं जपादिकं कुर्वन् देवाः कपोत इत्यनेन पञ्चभिर्द्विजैर्जप्तव्याः। सुदेव इति मन्त्रं शाकुनिकसूक्तद्वारा जपेत्। अथवा पापनिवृत्ति-अर्थे तस्याथर्वणशिरा जप्तव्याः। गोभूस्वर्णान्नदानेन सर्वपापं विनश्यति। तस्मात्प्रयत्नेन शान्तिकर्म समाचरेत्। इन्द्रद्वारार्गलस्त्विन्द्रध्वज इन्द्रदण्डो वा यदि नगरे दृश्येत्, तदा नृपवधं वदेत्। यदि गृहस्य स्तम्भ-द्वार-दारु-कपाटादिपतनं भवेत्, तेषामास्फोटनं वा भवेत्, तदा

गृहपतेर्वधो ज्ञेयः। सन्ध्याद्वयेऽनले दीप्ते धूमो वा, यदि काननेऽच्छिद्रे वा भुवि छिद्रं भूकम्पो वा, तदा भयप्रदः स्यात्। वेदाचारं परित्यज्य वेदबाह्यं समाचरेत्, नृपतिः सज्जनशीलरहितः, तदा नृपतिः सराष्ट्रेण विनश्यति। यत्र नगरे शिशवश्चोद्धताः कृत्रिमायुधाश्छिन्धिभिन्दि- उक्तवन्तस्तदा च शीघ्रं युद्धं भवति-इत्यादिशेत्। यदि गृहेषु भूतप्रेतपिशाचादिकं दृश्येत्, तदा तेषां द्वारा हानिभयं भवेत्, अतो दोषापनुत्तये शान्तिः कार्या। शचीं शचीपतिं संपूज्य तन्मन्त्रैर्हविं जुहुयात्, भूमिस्वर्णान्नदानैश्च बलिभिः शान्तिमाचरेत्। केतूनामुदयः सदा राजराष्ट्रविनाशाय स्यात्। वज्रं-अशनिः-भूकम्पः-सन्ध्यानिर्घातशब्दः-सूर्यचन्द्रयोः परिवेषः- रजोधूम-रक्तवर्णसूर्यस्योदयास्तौ-वृक्षेभ्यो भोजनं मधुरादिरसस्तथा तैलादि-उत्पत्तिः- पुष्पोद्गमः-पक्षिणां तथा सूर्यस्य विकाराः- एते चैत्रवैशाखयोर्मासयोः स्युः, तदा कल्याणप्रदा भवन्ति। तारोल्कापातकारणेन मलिनाकाशं-सूर्यचन्द्रयोः कपिलमण्डलं-अग्निं विना ज्वलनास्फोटः-युद्धेष्वनिलाहतिः-सन्ध्ययो रक्तपद्मारुणवर्णः- क्षुब्धार्णवोपमं नभः-जलं विना शुष्कनद्यः- एत उत्पाता ग्रीष्म-ऋतुकाले तदा शुभं वदेत्। इन्द्रधनुषं - सूर्यचन्द्रयोः परिवेषः- विद्युत्-शुष्कवृक्षाङ्कुरिता-भूकम्पनं-क्षितेः कम्पोर्द्वतनवैकृत्यं रसनं दरणं नद्योदपानसरसां विद्युच्चोत्तरणं- प्लवः- पर्वते स्थिता गृहाश्चलायमाना वर्षा-ऋतुकाले न भयावहाः। शुभप्रदाः स्युः। दिव्यस्त्री-समस्तप्राणाः-गन्धर्वः-विमानाद्भुतदर्शनं- ग्रहनक्षत्राणां दिनसमये दर्शनं -वनोपवने पर्वतस्य शिखरे गीतवादित्रनिर्घोषः- सस्यवृद्धिः - जलहानिः- एते शरद्-ऋतुकाले तदा शुभं वदेत्। शीतानिलतुषारत्वं- मृगपक्षीणां नृत्यं- राक्षस-यक्षादीनां दर्शनं- मनुष्यं विना वाणी-आकाशवनपर्वता धूमान्धकारयुक्ताः-उच्चैः सूर्योदयास्तौ - एते हेमन्त-ऋतुकाले तदा शुभं वदेत्। कृष्णाञ्जनसमाकाशं तारोल्कापातपिञ्जरम् - अर्थात् रात्रौ कृष्णाञ्जनसमं तथा तारोल्कापातकारणेनाकाशः पीतवर्णसमो दृश्यमानः, स्त्रीणां गर्भे नानाविधाकाराः, अश्वादिसदृशाङ्गानां विचित्रप्रकाराणां प्राणिनामुत्पत्तिर्भवेत्। तथा च

गजाश्वमृगपक्षिषु चित्रगर्भोद्भवः – पत्राङ्कुरलतानां च विकारा दृश्येयुः। एत उत्पाताः शिशिर–ऋतुकाले शुभाः स्युः। एतत्प्रकारेण सम्पूर्णानुत्पातानुक्त्वा तदनन्तरं काकमैथुनदृष्टेः शुभाशुभफलमुक्तम्। काकयोर्मैथुनं यो मनुजो दिवा रात्रौ वा कस्मिन्नपि स्थाने पश्येत्, तदा सः स्थानाच्च्युतः स्यात्, निधनं वा तस्य भवेत्। यो मनुजः काकयोर्मैथुनं पश्येत्, स महारोगाभितप्तः, शत्रुभिर्वा पराजितो भवति। अत एतद्दोषशमनार्थाय यत्नपूर्वकं शान्तिकर्म समाचरेत्। पूर्वोक्तविधिना कुण्डं कृत्वा होमं च कारयेत्। यत् इन्द्रं –इति त्रिभिर्मन्त्रैः सम्यक्त्र्यैय्यम्बकेन वा पालाशसमिदाज्यान्नैः पृथगष्टोत्तरशतमेवं यः सम्यक् कुरुते स तस्माद्दोषात् प्रमुच्यते। यस्य निवेशने शिथिली जायते तस्य हानिर्भवेत्। तथा दुःखशोकभयक्लेश एवं कुटुम्बकलहो भवेत्। वह्निभीतिः, शत्रुभीतिराधिव्याधिस्ततो भयं स्यात्। अतस्तद्दोषशमनार्थं यथाविधि शान्तिं कुर्यात्। सुवर्णेन प्रमाणेन तदर्धार्धेन वा पुनः प्रयत्नतो मृत्युरूपस्य प्रतिमां कल्पयेत्। अपमृत्युमपक्षुधामिति मन्त्रद्वयेन सम्पूर्णसामग्र्या सह पञ्चामृतेन स्नापनं कुर्यात्। उक्तप्रावरणं गृहे पूजयेत्। अन्ते नैवेद्यं समर्पयेत्। अब्लिङ्गैर्वारिमन्त्रैश्च मन्त्रितं वस्त्रवेष्टितं, सुवर्णरत्नैश्च संयुक्तं पूर्णकुम्भं ततः स्थापयित्वा अर्चयेत्। पूर्वदिशि कुण्डे वा स्थण्डिलेऽपि वा होमं कारयेत्। ततः पलाशसमिदाज्यान्नैरुक्तमन्त्रद्वयेन भक्तिपूर्वकमष्टशतमष्टाविंशतिवारं जुहुयात्। अनन्तरं तिलहोमं व्याहृतिभिस्ततः पूर्णाहुतिं जपेत्। मृत्युवारुणसूक्तैश्च ग्रहमन्त्रैस्त्रिपञ्चकैः। तत आचार्यद्वारा कुम्भोदकेन स्नानं कृत्वा प्रार्थयेत्। निष्कविंशत्या सह तां प्रतिमामाचार्यायैव दद्यात्। पश्चाच्छान्तिवाचनपूर्वकं ब्राह्मणान् भोजयेत्। एवं सम्यग्रीत्या यः शान्तिकर्म कुरुते, स तस्माद्दोषात्प्रमुच्यते। द्रव्यमन्त्रफलैः सहैषा साधारणशान्तिः कथिता।[११७]

ब्रह्मादिप्रत्येकदिक्क्रमेण द्रव्यमन्त्रफलैः सह शिथिली जायते। तस्य सप्ताहमध्ये शुभं

---

११७ व.सं. अ.४५ श्लो. ९८ तः १५२

भवेत्। तत उर्ध्वं व्याधिभयं स्यात्। तत्राधिदेवता ब्रह्मा स्यात्। अतस्तन्मन्त्रैणैव सर्पिषा, पलाशान्नेन जुहुयात्। यदि प्राच्यां दिशि शिथिली जायते तदाष्टवासराद् भयं स्यात्।अत ऊर्ध्वं राजभयं स्यात्। तत्राधिदेवता इन्द्रः स्यात्। अतस्तन्मन्त्रेण भक्तितः खदिराज्यान्नं जुहुयात्। यद्यग्निकोणे शिथिली जायते, तदा पञ्चवासरात् सुहृदागमः स्यात्।अत ऊर्ध्वं सर्पभयं स्यात्। तत्राधिदेवताग्निदेवता स्यात्। अतोऽग्निमन्त्रेणौदुम्बराज्यचरुभिर्भक्तितो जुहुयात्। यदि याम्यदिशि शिथिली जायते, तदा त्रिवासरादिष्टसिद्धिं प्राप्नोति।अत ऊर्ध्वं भार्यानाशः स्यात्। तत्राधिदेवता यमः। अतो याम्यमन्त्रेण भक्तितो घृतान्नप्लक्षसमिद्भिर्जुहुयात्। यदि नैऋत्यकोणे शिथिली जायते, तदाष्टवासराद् धनधान्यलाभो भवति। अत ऊर्ध्वं चौर्यभयं स्यात्। तत्राधिदेवता वरुणः। अतो वरुणसंज्ञकमन्त्रेण वटाज्यान्नेन जुहुयात्। यदि वायव्यकोणे शिथिली जायते, तदा त्रिवासरात् पशुनाशः स्यात्।अत ऊर्ध्वं शत्रुभयं स्यात्। तत्राधिदेवता वायुः। अतोऽपामार्गाज्यचरुभिः स्वयं जुहुयात्। यदि सौम्यदिशि(उत्तरदिशि) शिथिली जायते, तदाष्टवासरात् सुवर्णलाभो भवति। ततः पश्चात् कुटुम्बकलहो भवेत्। तत्राधिदेवता कुबेरः। अतः सौम्यमन्त्रेण भक्तितोऽश्वत्थसमिदाज्यान्नैर्जुहुयात्। यदीशानकोणे शिथिली जायते, तदाष्टवासरात् स्वर्णलाभो भवेत्।अत ऊर्ध्वं तु निधनं स्यात्। तत्राधिदेवता रुद्रः। अतस्तन्मन्त्रेण भक्तित ऋचा आज्यान्नकसमिद्भिश्च जुहुयात्। यदि देवहोमस्थानेषु, कूपस्थानेषु तथा च भोजनस्थानेषु शिथिली जायते तदा मृत्युर्भवेत्। यद्यन्नभाण्डे शिथिली जायते, तदान्नहानिः स्यात्। यदि स्नेहभाण्डे शिथिली जायते, तदा प्रजाक्षयः स्यात्। यदि सर्वे च जलभाण्डे शिथिली जायते, तदा पत्नीनाशः स्यात्। यदि शयने शिथिली जायते, तदा कर्तृमृत्युर्भवेत्। यदि कुण्डोपरि शिथिली जायते, तदा धनक्षयः स्यात्। यद्यालवालपटुस्थाने शिथिली जायते, तदा नृपभयं स्यात्। यद्युलूखले कुशूले च द्वारदेशे शिथिली जायते, तदा महारुग् भवेत्। यदि प्राकारे-प्राङ्गणे-अलिन्दे-क्रीडास्थाने शिथिली जायते, तदा तनुक्षयो

भवेत्। यदि गवां स्थानेषु शिथिली जायते, तदा गोहानिः स्यात्। यदि पशुस्थानेषु शिथिली जायते, तदा पशुक्षयः स्यात्। यदि दधिभाण्डेषु शिथिली जायते, तदा तन्नाशः स्यात्। यदि क्षीरभाण्डेषु शिथिली जायते, तदा शिशुक्षयः स्यात्। यद्याज्यभाण्डेषु शिथिली जायते, तदान्नभीतिः स्यात्। यदि मधुभाण्डेषु शिथिली जायते, तदा तपःक्षयः स्यात्। यदि सौवीरपक्वभाण्डे, लवणभाण्डे शिथिली जायते, तदा कलहागमः स्यात्। यदि पेटिकायां शिथिली जायते, तदा वस्त्रहानिः स्यात्। यदि तरुपीठे शिथिली जायते, तदा शत्रुभयं स्यात्। यदि ग्रहोपकरणे शिथिली जायते, तदा क्षिप्रं तस्करभयं भवेत्। यदि शाकिनी-आराम-खलपूसस्यक्षेत्रे शिथिली जायते, तदा फलक्षयो भवेत्। यदि पुरीषमन्दिरे, गोष्ठे (गोवृषाणां) शिथिली जायते, तदाचिकित्सका रुग् भवेत्। पूर्वोक्तेषु सर्वेषु तुल्यस्थानानि राज्ञां च कथ्यन्ते। यत्र ग्रामे, पुरे, जनपदे शिथिली जायते, चैत्ये, देवालये, सेनायां, विपिने, पर्वतेषु, नदीतीरे, जले, क्षुद्रदेवगृहेषु, अश्वालये, गजगृहे, खरोष्ट्रमृगपक्षिणां गृहे, विद्यालये, शस्त्रगृहे, राज्योपकरणालये, दासीदासगृहाद्येषु तत्तद्वर्गविनाशनं स्यात्। एते दोषाः साधारणया शान्त्यैव लयं ययुः। तस्मात् शान्तिपूर्वकं द्विजान् भोजयेत्।[११८]

कुड्यङ्गे -कर्णे यत्स्थाने कर्णाभूषणं धार्यते, तत्स्थाने, भाले वा जायते, तदाभूषणप्राप्तिः स्यात्। मस्तकाद्यङ्गे पतिते राज्यनाश इति फलं प्राप्नोति। वक्षःस्थले सौभाग्यमिति फलं प्राप्नोति। हृदि प्रीतिवर्धनं स्यात्। कुक्षौ पुत्रलाभः स्यात्। नाभौ कीर्तिविवर्धनं स्यात्। नेत्रयोर्मित्रलाभो भवेत्। नासिकोपरि सुगन्धप्राप्तिः स्यात्। वक्त्रे भोजनप्राप्तिर्भवेत्। कण्ठे स्त्रीलाभो भवेत्। स्कन्धयोर्जयो भवेत्। हस्ते तेजोविवृद्धिः स्यात्। करद्वयोर्धनवृद्धिर्भवेत्। पृष्ठेऽर्थलाभो भवेत्। पार्श्वयोः सुहृदागमः स्यात्। कटिस्थाने वस्त्रलाभो भवति। गुह्यस्थाने समागमो भवेत्। गुदे रोगविनाशः स्यात्। ऊरुजान्वोर्यात्रा,

---

११८ व.सं. अ.४५ श्लो. १५३ तः १७६

वाहनप्राप्तिः स्यात्। तथा जङ्घयोः, पादयोश्च सदा गमनमादिशेत्। यदा पादयोश्चोर्ध्वं मस्तकपर्यन्तं गमनं कुर्यात्, यदा गात्रप्रदक्षिणा वापि,तदा राज्यलाभो भवेत्। मस्तकात्पादपर्यन्तं कुड्यतो यदि गच्छेत्, तदा गात्रप्रदक्षिणा वापि हानिं शोकं समादिशेत्। सरटीपतने सर्वाङ्गेषु सर्वदा हानिः स्यात्। यद्यूर्ध्वं गच्छेत्, तदा कुटुम्बकलहागमः स्यात्। अतः सरटीपतनादेव सचैलं स्नानमाचरेत्। रोगः(व्याधिः)-लक्ष्मीप्राप्तिः- अग्निभयं – बन्धुनाशः - धनक्षयः –महद्यशः- मित्रलाभः - पुत्रहानिस्तथा पृथ्वीक्षयः - एतानि फलानि। मस्तकतो ब्रह्मस्थानपर्यन्तं पतति, तदा एतत्फलं ज्ञेयम्। मस्तकेऽग्निदाहः। काक-श्येनादिनिहते शुष्कनिष्ठीवदूषिते विनापि वपनं सम्यक् केशानां शुद्धिरिष्यते। पञ्चगव्यसहितं तैलेनाभ्यङ्गस्नानं समाचरेत्। पश्चात्सम्पूर्णजलेन नवकुम्भं प्रकल्पयेत्। पञ्चत्वक्पल्लवोपेतं पञ्चामृतसमन्वितम्, अष्टमृत्तिकासद्बीजस्वर्णरत्नसमन्वितं, शतौषधिसमायुक्तं, शुक्लवस्त्रसमन्वितं, अब्लिङ्गवारुणैः, सूक्तैर्मन्त्रिते समलंकृतं धान्योपरि सुसंस्थाप्य चोपचारैः समर्चयेत्। स्नात्वा तत्कुम्भतोयेन तिलहोमं समाचरेत्। ततो ब्राह्मणाय वस्त्रं, सदक्षिणं कुम्भं दद्यात्। पश्चाद् ब्राह्मणान् भोजयेत्। स तस्माद्दोषात्प्रमुच्यते।[११९]

## १.४.१४ रोगोत्पत्तिशान्तिः —-

वृद्धवसिष्ठसंहिताग्रन्थे षट्चत्वारिंशदध्याये रोगोत्पत्तिशान्तिनामक एकशताधिकचर्तुदश (११४)श्लोकाः सम्मिलिताः ।

रोगार्तानां जनानां शरीरिणां रोगशान्त्यर्थे बलिं दत्त्वा, होमहवनं कृत्वा पूजाङ्गद्वारा तथा जपं कृत्वा विप्रान् भोजयेत्। अथ रोगाणां शान्तिः कथ्यते। यस्मिन्नक्षत्रे नृणां रोगः संजायते,

---

११९ व.सं. अ.४५ श्लो. १७७ त: १९३

तदा सदैव नक्षत्रस्वामिनः संतुष्ट्यर्थे नक्षत्रपूजनं कारयेत्। वित्तानुसारेण नक्षत्रप्रतिमां सुवर्णेन प्रमाणेन तदर्धेन कल्पयेत्। ईशान्यामथवा पूर्वदिश्युत्तरदिशि वा सल्लिखेत्। तण्डुलोपर्य्यष्टदलं पद्मं गोमयमण्डले, पञ्चामृतैः सहोमैश्च तत्तन्मन्त्रैः पृथक् पृथक् स्नाप्य कल्पोक्तमन्त्रेण प्रतिमां ततः स्थापयेत्। कर्णिकायां सुसंस्थाप्य धृत्वा देवं समर्चयेत्। तद्वर्णवस्त्रगन्धाद्यैरुक्तधूपोपहारकैरारक्तवर्णं कुम्भं च पञ्चत्वक्पल्लवैर्युतं शुक्लवस्त्रस्वर्णरत्न-शतौषधिसमन्वितं मृत्पञ्चगव्यसद्बीजफलक्षौद्रकुशान्वितं देवस्य पूर्वतः स्थाप्य जलमन्त्रैः समर्चयेत्। ततः प्राच्यां स्थण्डिले विधिवत् ततोऽग्निं स्थापयेत्। तत उक्तद्रव्यादिद्वाराष्टसहस्रकमन्त्रैर्जुहुयात्। तिलाज्यहोमव्याहृतिभिरष्टोत्तरसहस्रकं मन्त्रैः पूर्ववत् स्नायीत। सम्यक् पूर्णाहुतिं च जुहुयात्। पश्चात् शुद्धासन उपविष्टो रोगिणः प्राङ्मुखस्य मन्त्रपूतैः कुम्भजलैरब्लिङ्गैर्वारिमन्त्रकैर्मार्जनं सम्यक् कारयेत्। पश्चात् स शुद्धात्मा पूजास्थाने समागतः संकल्पपूर्वकं नीराजयेत्। अग्निदेवाय नमनं कृत्वा भक्तिपूर्वकं प्रार्थयेत् – अमृतोद्भवधिष्ण्येश यतस्त्वं शंकरात्मकः। रोगादस्माच्च मां रक्ष तव वश्याश्च धिष्ण्यपाः। इति प्राथ्र्य ततो वस्त्रसंयुतां प्रतिमां भक्तिपूर्वकमाचार्याय कुटुम्बिने दक्षिणासहितां दद्यात्। तथा च यथाशक्ति विप्राय दक्षिणां दत्त्वा भक्तिपूर्वकं ब्राह्मणान् भोजयेत्। नक्षत्रतिथिवासराणां पूजा कारयेत्, सर्वान्कामानवाप्नोति। तथा रोगी रोगात्प्रमुच्यते।[१२०]

### अथ अश्विन्यादिनक्षत्रोत्थितरोगाणां शुभाशुभफलम् —

अश्विनीनक्षत्रोत्थितो रोगो नवरात्रात् पश्चान्मुञ्चति। देवस्य त्वेति मन्त्रेण गायत्री चकश्यपोऽश्विनौ श्वेतवर्णौ सुधापूर्णौ कुम्भाम्भोजधरौ चन्दनोत्पलपुष्पाज्यगुग्गुलुगुडप्रियौ क्षीरलड्डूकभोक्तारौ समिधः क्षीरवृक्षजाः गुडोदनबलिं सार्धनिशामुखे दीपैर्दद्यात्।[१२१]

---

१२० व.सं. अ.४६ श्लो. १ तः १६

१२१ व.सं. अ.४६ श्लो. १७ तः १९

भरणीनक्षत्रे रोग उत्पन्नः, तदा शीघ्रं रोगिणो मृत्युर्भवेत्। अथवा मासानन्तरं रोगो मुञ्चति। त्र्यम्बकस्य तु मन्त्रस्य चोक्ता छन्दर्षिदेवताः। गन्धोऽगुरुः करवीरं पुष्पं धूपश्च गुग्गुलुः, आज्यदीपश्च सर्वेषां नैवेद्यं च गुडोदनं पाशदण्डधरो रक्तस्ताज्यमध्वाक्षतैर्हविः, महिषीनायकारूढः कृशरान्नबलिं हरेत्। वक्ष्यप्रमाणेन मन्त्रेण बलिं सम्यक् प्रदापयेत्।[१२२]

कृत्तिकानक्षत्रे रोग उत्पन्नो भवेत्, तदा व्याधिर्दशरात्रेण मुञ्चति। स्रुक्स्रुवाभयवरदः स्ववर्णो मेषवाहनः मेधातिथिर्जगत्यग्निः, पुनन्तु मामिति मन्त्रश्चन्दनं यूथिकापुष्पं घृतदीपः सगुग्गुलुः, तिलमाषान्नं चणकाद्येन संयुतं नैवेद्यं दद्यात्। तत्र गुडोदनं हविर्जुहुयात्, पायसेन बलिं हरेत्।[१२३]

रोहिण्यामुत्थितो रोगो दशरात्र्यनन्तरं मुञ्चति। नमो ब्रह्मण्य इति मन्त्रस्य छन्दो गायत्री तथा देवता ब्रह्मा । कमण्डलुरक्षमालां धारयत्, सूत्राभयप्रदो ब्रह्मा, चन्दनं, कमलपुष्पं, दशाङ्गगुग्गुलं तथा घृतसहितं पायसं सर्वदानैर्हविर्भवेत्। तथा च दधिक्षीरघृतक्षौद्रशाल्यन्नेन पूजयेत्।[१२४]

मृगशीर्षनक्षत्रोत्थितो रोगः पञ्चरात्रेण मुञ्चति। गदायुतो वरदपाणिश्च तस्य श्वेतवर्णरथो वाहनं स्यात्। नवो नवो भवति – इति मन्त्रेण पूजयेत्। तस्य छन्दो गायत्री, ऋषिर्गौतमस्तथा देवता चन्द्रमाः। तस्य चन्दनं, कुमुदं पुष्पं,दशाङ्गपूजनेन पायसोदनं नैवेद्यं दत्त्वा मण्डकापूपं घृतक्षौद्रसमन्वितं शर्करादधिमिश्रेण शुक्लान्नेन पूजयेत्।[१२५]

आर्द्रनक्षत्रोत्थितो रोगोऽचिरान्निधनप्रदः स्यादथवा मासेन मुञ्चति। शुद्धस्फटिकसंकाशः शूलखड्गाभयेष्टदः। शङ्कराय नमः– इति मन्त्रेण पूजयेत्। तस्य छन्दो बृहती, देवता रुद्रः,

---

१२२ व.सं. अ.४६ श्लो. २० तः २३
१२३ व.सं. अ.४६ श्लो. २४ तः २६
१२४ व.सं. अ.४६ श्लो. २७ तः २९
१२५ व.सं. अ.४६ श्लो. ३० तः ३२

तथा ऋषिर्ब्रह्मा। चन्दनं, सुगन्धितपुष्पेण पूजयेत्। दशाङ्गं पायसोदनं समध्वाज्यं हविस्तत्र दध्योदनबलिं हरेत्।[१२६]

पुनर्वसुनक्षत्रोत्थितो रोगो नवरात्रेण मुञ्चति। कमण्डल्वक्षसूत्रेध्मदर्भस्रुक्स्रुवभृत्। अदितिर्द्यौः – इति मन्त्रेण पूजयेत्। तस्य मन्त्रस्य छन्दस्त्रिष्टुप्, देवतादितिस्तथा ऋषिर्ब्रह्मा। तस्य हरिद्राकुङ्कुमगन्धपुष्पसेवन्तिकादयः, धूपो मलयजो, पिष्टं घृतान्नं, पीतवर्णकं घृताक्तं तण्डुलं हविः, पीतान्नेन बलिं हरेत्।[१२७]

पुष्यनक्षत्रोत्थितो रोगः सप्तरात्रेण मुञ्चति। पीतोदण्डकमण्डल्वक्षसूत्राभयोद्यतः, बृहस्पत इति मन्त्रेण पूजयेत्। तस्य मन्त्रस्य छन्दस्त्रिष्टुप् , देवता बृहस्पतिः, तथा ऋषिरङ्गिराः। तस्य कुङ्कुमं वारिजं पुष्पं नैवेद्यं घृतपायसं, मण्डकागुड़संयुक्तं हविर्भवेत्। तस्य समण्डकघृतान्नेन पूजां प्रदापयेत्।[१२८]

आश्लेषानक्षत्रोत्थितो रोगोऽत्यधिककष्टेनैकमासेन मुञ्चति। नमो अस्तु इति मन्त्रेण पूजयेत्। तस्य मन्त्रस्य छन्दो विराट्, देवता सर्पराजस्तथा ऋषिरग्निः। तस्य मधुपर्णो भोगयुक्तः खड्गचर्मधरः शुभः सकङ्कुमागुरुगन्धं पुष्पं चागस्तिसम्भवं घृतगुग्गुलधूपो नैवेद्यं क्षीरसर्पिषो हविः साज्यं सुदध्यान्नं दध्योदनबलिं हरेत्।[१२९]

मघानक्षत्रोत्थितो रोगः शीघ्रं मृत्युप्रदः। अथवा सार्धमासेन मुञ्चति। धूम्रो दण्डपवित्रधृक् आयन्तु – इति मन्त्रेण पूजयेत्। तस्य मन्त्रस्य छन्दो जगती, देवता पितरस्तथा ऋषिर्ब्रह्मा। तस्य चन्दनं चम्पकं पुष्पं धूपः सघृतगुग्गुलुर्नैवेद्यं घृतपिष्टान्नं तिलान्नं सघृतं हविः

---

१२६ व.सं. अ.४६ श्लो. ३३ तः ३५
१२७ व.सं. अ.४६ श्लो. ३६ तः ३८
१२८ व.सं. अ.४६ श्लो. ३९ तः ४१
१२९ व.सं. अ.४६ श्लो. ४२ तः ४४

सतिलान्नमुद्गान्नेन पितृतुष्टये पूजयेत्।[१३०]

पूर्वाफाल्गुनीनक्षत्रोत्थितो रोगोऽर्धमासेन मुञ्चति। भग एव मन्त्रस्य छन्दो गायत्री तथा त्रिष्टुप्, देवता भगस्तथा ऋषिर्गोविधि: स्यात्। पद्माभयकर: पद्मवर्ण: सिंहासने स्थित:, चन्दनं मालतीपुष्पं बिल्वधूपो घृतोदनं नैवेद्यं शर्करापूपलड्डूकाभिश्च संयुतं घृतोदनं हविस्तत्र पायसेन बलिं हरेत्।[१३१] उत्तराफाल्गुनीनक्षत्रोत्थितो रोगोऽर्धमासेन मुञ्चति। पद्मवर्ण: पद्मसंस्थ: पद्मगर्भसमुद्यत:, अर्यमायानि – मन्त्रस्य अर्यमा त्रिभिरब्जज: कर्पूरं कुङ्कुमं गन्धपुष्पधूपकसंज्ञकं घृतगुग्गुलुधूपो नैवेद्यं घृतपायसं होमद्रव्यं घृतान्नं शाल्यन्नेन बलिं हरेत्।[१३२]

हस्तनक्षत्रोत्थितो रोगो नवरात्रेण मुञ्चति। उदु त्यमिति मन्त्रेण पूजयेत्। तस्य मन्त्रस्य छन्दो गायत्री , देवता आदित्य:। तस्य रक्तगन्धकुङ्कुमं च पुष्पं राजीवसंज्ञकं सगन्धगुग्गुलुर्धूपो नैवेद्यं घृतपायसं मधुपुष्पतिलाज्यान्नं दूर्वाभि: सहितं हविर्गुडशर्करामध्वाज्यपिष्टान्नेन बलिं हरेत्।[१३३]

चित्रानक्षत्रोत्थितो रोगो दशरात्रेण मुञ्चति। चित्रदेवानाम् – इति मन्त्रेण पूजयेत्। तस्य मन्त्रस्य छन्दो गायत्री, देवता त्वष्टा तथा ऋषि: सूर्य:। तस्य अक्षसूत्रजपकरस्त्वमिन्द्र: च पांशिले रत:, सकुङ्कुमागुरुर्धूप: कुसुमं चित्रवर्णकं नैवेद्यं मोदकाज्यान्नं चित्रान्नं सघृतं हवि:, तदन्नेन सर्वरोगापनुत्तये बलिं दद्यात्।[१३४]

स्वातीनक्षत्रोत्थितो रोग: सर्वदा मृत्युप्रद:। अथवा एक-द्वि-त्रि-चतु:-पञ्चमासैवापि

---

१३० व.सं. अ.४६ श्लो. ४५ त: ४७
१३१ व.सं. अ.४६ श्लो. ४८ त: ५०
१३२ व.सं. अ.४६ श्लो. ५१ त: ५३
१३३ व.सं. अ.४६ श्लो. ५४ त: ५६
१३४ व.सं. अ.४६ श्लो. ५७ त: ५९

विमुञ्चति। स नः पिता इति मन्त्रेण पूजयेत्। तस्य मन्त्रस्य छन्दो गायत्री, देवता मरुत् तथा ऋषिरङ्गिराः। खड्गचर्मधरः कृष्णो गन्धकृष्णागुरुभृत् पुष्पं दमनकं धूपं चन्दनागुरुगुग्गुलुर्नैवेद्यं पायसं साज्यं हविस्तेन बलिं हरेत्।[१३५]

विशाखानक्षत्रोत्थितो रोगो मासेनैकेन मुञ्चति। इन्द्राग्नौ इति मन्त्रेण पूजयेत्। तस्य मन्त्रस्य छन्दो गायत्री, देवता इन्द्राग्निस्तथा ऋषिर्मधुच्छन्दः। तयोः पूर्ववद् ध्यानं कृत्वा श्रीखण्डं कुङ्कुमं सरोरुहपुष्पं देवदारुतरोर्धूपो नैवेद्यं घृतपायसं तदेवान्नं हविस्तत्र चित्रान्नेन बलिं हरेत्।[१३६]

अनुराधानक्षत्रोत्थितो रोगो दशरात्रेण मुञ्चति। मित्रस्य चर्षिणी इति मन्त्रेण पूजयेत्। तस्य मन्त्रस्य छन्दो गायत्री, देवता मित्रस्तथा ऋषिर्हिरण्यस्तूपः। द्विभुजः पद्मगर्भाख्यः पद्मभृत्पद्मसंस्थितः कुङ्कुमपुण्डरीकाख्यं पुष्पं धूपं च चन्दनेन पूजयेत्। पायसं साज्यं नैवेद्यं धृत्वा कन्दमसूरिकं हविः कृत्वा मधुशर्करापायसं घृतपूरकमाषान्नं मुद्गगर्भैश्च संयुतं बलिं तत्र प्रदापयेत्।[१३७]

ज्येष्ठानक्षत्रोत्थितो रोगो निःसंशयेन मृत्युप्रदः। अथवा निःसंशयेन मासेनैकेन रोगं मुञ्चति। इन्द्रव इति मन्त्रेण पूजयेत्। तस्य मन्त्रस्य छन्दो गायत्री, देवता इन्द्रस्तथा ऋषिरङ्गिराः। इन्द्रस्य पूजनं पूर्ववद् गन्धचन्दनशुभपुष्पेन कारयेत्। कर्पूरधूपो नैवेद्यं चित्रान्नं सुमनोहरहविः,सूरणं कन्दं मधुकन्दं सुपायसं विचित्रपुष्पगन्धेन दध्यन्नेन पूजयेत्।[१३८]

मूलनक्षत्रोत्थितो रोगो मासार्धेन मुञ्चति। खड्गवर्मधरः कृष्णः करालवदनप्रभुः, मो षु ण- इति मन्त्रेण पूजयेत्। तस्य मन्त्रस्य छन्दो गायत्री, देवता निर्ऋतिः, तथा ऋषिः

---

१३५ व.सं. अ.४६ श्लो. ६० तः ६२
१३६ व.सं. अ.४६ श्लो. ६३ तः ६५
१३७ व.सं. अ.४६ श्लो. ६६ तः ६९
१३८ व.सं. अ.४६ श्लो. ७० तः ७२

घोरकण्ठः। गन्धः कृष्णागुरुः शुभपद्मनीलोत्पलपुष्पं धूपं कृष्णागुरुर्माषमिश्रितं चोपहारकं स्यात्। तत्र तदेवान्नेन हविं कृत्वा माषान्नेन बलिं हरेत्।[१३९]

पूर्वाषाढानक्षत्रोत्थितो रोगो रोगिणो निधनप्रदः स्यात्। अथवा स एक-द्वि-त्रि-चतुः-पञ्च-षट्-सप्तमासैर्वापि विमुञ्चति। आप्यायस्व - इति मन्त्रेण पूजयेत्। तस्य मन्त्रस्य छन्दो गायत्री। सुवर्णो द्विभुजः पद्मपाणिर्गन्धस्तु चन्दनं पद्मशैलेयधूपोऽन्नं घृतपायसं नैवेद्यं हविर्मसूरमिष्टान्नं, तदन्नेन बलिं हरेत्।[१४०]

उत्तराषाढानक्षत्रोत्थितो रोगः सार्धमासेन मुञ्चति। विश्वेदेवा इति मन्त्रेण पूजयेत्। तस्य मन्त्रस्य छन्दो गायत्री, देवता विश्वेदेवाः। कमण्डल्वभयाम्भोजवरदाश्च कुशासनाश्चन्दनं, कमलं पुष्पं, धूपं सघृतगुग्गुलुपूजनेन पायसाज्यान्नेन नैवेद्यं,एतदेव हि हविः।[१४१]

श्रवणनक्षत्रोत्थितो रोगो दशरात्रेण मुञ्चति। अतो देवेति मन्त्रेण पूजयेत्। तस्य मन्त्रस्य छन्दो गायत्री, देवता विष्णुः, तथा ऋषिर्ब्रह्मा। पीताम्बरः कृष्णवर्णः शङ्खचक्रगदाम्बुजः,चन्दनं मालतीपुष्पं धूपः कर्पूरगुग्गुलुः शाल्यन्नं षड्रसोपेतं भक्ष्यभोज्यादिभिः सह नैवेद्यं दत्त्वा हविरप्येतत्पायसेन बलिं हरेत्।[१४२]

धनिष्ठानक्षत्रोत्थितो रोगो दशरात्रेण मुञ्चति। त्रायन्ता इति मन्त्रेण पूजयेत्। तस्य मन्त्रस्य छन्दोऽनुष्टुप् , देवता वसु, तथा ऋषिर्व्यासः। चापबाणधरः, शुक्लगन्धः, गुग्गुलधूपो वारिजं कर्पूरचन्दनैंन पूजनं कृत्वा घृतपायसेन नैवेद्यं दत्त्वा हविश्चोदुम्बरसमिद्घृतपायससंयुतं लड्डूकापूपमध्वाज्यतिलपिष्टेन बलिं हरेत्।[१४३]

---

१३९ व.सं. अ.४६ श्लो. ७३ त: ७५
१४० व.सं. अ.४६ श्लो. ७६ त: ७८
१४१ व.सं. अ.४६ श्लो. ७९ त: ८१
१४२ व.सं. अ.४६ श्लो. ८२ त: ८४
१४३ व.सं. अ.४६ श्लो. ८५ त: ८७

शतभिषानक्षत्रोत्थितो रोगोऽष्टरात्रेण मुञ्चति। इमं मे वरुणः - इति मन्त्रेण पूजयेत्। तस्य मन्त्रस्य छन्दो गायत्री, देवता वरुणः, तथा ऋषिः कपवचा। नागपाशधरः श्रीमान्नवरत्नविभूषितो मकरस्थो गुरुर्गावः कमलात्मकपुष्पं कर्पूरचन्दनं धूपो नैवेद्यं घृतपोलिका हविरश्वत्थसमिद्भिश्चित्रान्नेन बलिं हरेत्।[१४४]

पूर्वाभाद्रपदनक्षत्रोत्थितो रोगः सर्वदा मृत्युप्रदः। अथवा बहुभिर्मासैर्दिवसैर्वा विमुञ्चति। वामपादकरं भूम्याकाशे त्वधरद्वयं प्रसार्य प्राञ्जलिः साक्षादीश्वरं चिन्तयन् स्थितः। शतमग्निमिति मन्त्रेण पूजयेत्। तस्य मन्त्रस्य छन्दो गायत्री, तथा ऋषिर्ब्रह्मा। चन्दनं गन्धं, श्वेतार्कसंज्ञकं पुष्पं, धूपः शतौषधिमूलेन पूजयेत्। घृतपायसं नैवेद्यं दत्त्वा हविः कुष्माण्डखण्डः स्याद्दध्यन्नेन बलिं हरेत्।[१४५]

उत्तराभाद्रपदानक्षत्रोत्थितो रोगः सार्धमासेन मुञ्चति। नमस्ते रुद्र - इति मन्त्रस्य जपः, तत्रैव संस्थितः कुर्यात्। गन्धचन्दनकर्पूराः शुभपद्मोत्पलपुष्पं सबिल्वं गुग्गुलुर्धूपेन पूजनं कारयेत्। घृतपायसं नैवेद्यं दत्त्वा मुद्ग-माष-तिल-अन्न-आज्य-यव-व्रीहीमयं हविः, माषमुद्गतिलान्नेन सम्यक् तत्र बलिं हरेत्।[१४६]

रेवतीनक्षत्रोत्थितो रोगोऽष्टरात्रेण मुञ्चति। हंसः शुचिषद्- इति मन्त्रेण पूजयेत्। तस्य मन्त्रस्य छन्दो जगती, देवता पूषास्तथा ऋषिः कश्यपः। कमलवर्णाम्भोजधरदेवता, शुभकमलं धारयेत्, रक्तचन्दनगन्धे पुष्पं मन्दारसम्भवं धूपस्तु गुग्गुलसहितेन पूजनं कारयेत्। तथाज्यसहितं घृतपायसं नैवेद्यं दत्त्वा हविस्तदेव सलिलं दध्यन्नेन बलिं हरेत्। भगवतः शिवस्यानुचरकारणेन महाज्वरो रोगाणां स्वामी।[१४७]

---

१४४ व.सं. अ.४६ श्लो. ८८ तः ९०
१४५ व.सं. अ.४६ श्लो. ९१ तः ९४
१४६ व.सं. अ.४६ श्लो. ९५ तः ९७
१४७ व.सं. अ.४६ श्लो. ९८ तः १०१

अत एव यस्माच्च मां त्राहि तमुत्तमं बलिं गृहाण। प्रतिपत्तिथौ यदि रोग उत्थितः, तदा पञ्चरात्रेण मुञ्चति। तस्य देवता ब्रह्मा स्यात्। तत्र पायसेन बलिं हरेत्। तृतीयातिथौ यदि रोग उत्थितः, तदा सप्तरात्रेण मुञ्चति। तस्य देवता पार्वती। तत्र घृताक्तेन बलिं हरेत्। चतुर्दश्यां तिथौ यदि रोग उत्थितः, तदा मृत्युर्भवेत्। अथवा द्विमासकैः पश्चान्मुक्तिर्भवति। तत्र सर्वासां देवतानां पिष्टान्नेन बलिं हरेत्। पौर्णिमातिथौ यदि रोग उत्थितस्तदा त्रिरात्रेण विमुञ्चति। तस्य देवता चन्द्रमाः। तत्र दध्योदनेन बलिं हरेत्।[१४८]

यदि रविवासरे, सोमवासरे, भौमवासरे वा रोग उत्थितस्तदात्यधिकं क्लेशो मृत्युर्वा भवेत्। तस्य देवता भौमः। तत्र रक्तान्नेन बलिं हरेत्। यदि बुधवासरे रोग उत्थितः, तदा सप्तरात्रेण मुञ्चति। तस्य देवता बुधः। तत्र मुद्गान्नेन बलिं हरेत्। यदि गुरुवासरे रोग उत्थितः, तदा पञ्चरात्रेण मुञ्चति। तस्य देवता गुरुः। तत्र हरिद्रान्नेन बलिं हरेत्। यदि शुक्रवासरे रोग उत्थितः, तदा सप्तरात्रेण मुञ्चति। तस्य देवता शुक्रः। तत्र चित्रान्नेन बलिं हरेत्। यदि शनिवासरे रोग उत्थितः, तदा मासार्धेन विमुञ्चति। तस्य देवता शनिः। तत्र माषान्नेन बलिं हरेत्।[१४९]

एवं राश्यादिषु तस्य स्वामिनः, दुर्गां वा बलिं हरेत्। यो बलिं कुरुते, स रोगी रोगात्प्रमुच्यते। आधाननक्षत्रे, निधननक्षत्रे, प्रत्यरितारानक्षत्रजनितव्याधिः क्लेशाय मरणाय च स्यात्। आश्लेषा–आर्द्रा–त्रिपूर्वा (पूर्वाफाल्गुनी–पूर्वाभाद्रपदा–पूर्वाषाढा)–भरणी–शतभिषा–ज्येष्ठा–कृत्तिकानक्षत्रेषु, द्वादशी–षष्ठी–चतुर्थीतिथौ शनि–भौम–रविवासरे–एषु दिनेषु एतद्योगेषु यदि स्त्रीणां रोगः संजायते, तदा शीघ्रं यमलोकं प्राप्नोति। एतत्प्रकारेण चान्द्रजन्मनक्षत्रतोऽभीष्टदिने चान्द्रनक्षत्रं गणनीयम्। यदि अष्टमस्थाने, चतुर्थस्थाने वा

---

१४८ व.सं. अ.४६ श्लो. १०२ तः १०५

१४९ व.सं. अ.४६ श्लो. १०६ तः १११

द्वादशस्थाने स्थिते, मृत्युर्भवेत्। लग्ने वा मृत्युराशौ स्थिते शीघ्रं मृत्युर्भवेत्।[१५०]

## १.४.१५ अश्वारिष्टशान्तिः —

वृद्धवसिष्ठसंहिताग्रन्थे चतुस्त्रिंशदध्यायेऽश्वारिष्टशान्तिनामके त्रयोविंशति(२३)श्लोकाः सम्मिलिताः ।

यस्य नृपस्य समीपेऽश्वाः सन्ति, स युद्धे सदा विजयी भवेत्। तथा स श्रीमान् स्यात्। अतस्तस्मात्तेषां रक्षणं कार्यम्। यस्मिन्समये सूर्यः स्वातीनक्षत्रगतः स्यात्, तदा बहवो रोगा जायन्ते। यदा यदाश्वानां रोगा जायन्ते, तदा लोकपालसहितं गणेशपूजनं कार्यम्। तथा होमं कारयेत्। भौमवासरे, सूर्यसंक्रमणदिने, अयने, उत्तरायणे, दक्षिणायने वा, विषुवसंक्रान्तिदिने, क्षयतिथिदिने, व्यतीपाते, द्वादशीतिथिदिने, अश्विनीनक्षत्रदिने ईशानकोणेऽष्टभिश्चतुर्भिर्वा हस्तैर्मण्डपः कार्यः। चतुर्द्वारं वितानं वस्त्रतोरणाद्यैरलंकृतं कार्यम्। तन्मध्ये वेदिकान्ते पञ्चविंशतिमानतो मण्डपस्य बहिः प्राच्यां पूर्वोक्तलक्षणानुसारेण स्वस्तिवाचनपूर्वकं कृत्वा पूर्ववद् विप्रान् वरयेत्। अश्वारूढं, पञ्चवक्त्रं दशाम्बकं रक्तवर्णं, कशाखण्डं रेवन्तं द्विभुजं सूर्यपुत्रं स्मरेत्। सूर्यपुत्र नमस्तेऽस्तु नमस्ते पञ्चवक्त्रक। नमो गन्धर्वदेवाय रेवन्ताय नमो नमः।।

अनेन रेवन्तमन्त्रेण गन्धवस्त्राक्षतादिभिर्विधिवद् वेदिकामध्ये तण्डुलोपरि पूजयेत्। परितः स्वस्वमन्त्रैस्तान्ताँल्लोकपालांश्च पूजयेत्। पूर्ववत्पञ्च गजा एवं षडश्वानां समीपे ऋग्वेदादिचतुर्वेदान् पठेत्। पूर्वतः पूर्णकुम्भान् रक्तवर्णान् गन्धवस्त्राद्यलङ्कृतान् पञ्च त्वक्पल्लवोपेतान्, अष्टमृत्तिकासंयुतपात्रान् द्वारेषु स्थाप्याब्लिङ्गमन्त्रैः समर्चनं कार्यम्। रेवन्तपूजामाचार्यः कृत्वा गृह्यविधानतस्तस्मिन्कुण्डे व्याहृतिभिरग्निं स्थापयेत्। अनन्तरं

---

१५० व.सं. अ.४६ श्लो. ११२ तः ११४

तत्राज्यभागान्ते मुखाहुतिमतन्द्रितः – अग्नये स्वाहा –इति नादेन प्रयत्नतः घृतं हुत्वा कुर्यात्। आद्यन्तप्रवणेनाष्टोत्तरशतं रेवन्तपूजामन्त्रेण पलाशसमिधाज्यान्नैराचार्यो व्रीहितिलान्व्याहृतिभिस्तत एकरात्रं, त्रिरात्रं नवरात्रं वा जुहुयात्। अनेन विधिना जितेन्द्रिय एकभुक्तो कुर्यात्। जपादिपूर्वकं सम्यक्कर्ता पूर्णाहुतिं जुहुयात्। अनन्तरं मङ्गलघोषैश्च नैवेद्यं समर्पयेत्। ततस्तद्धुतशेषेण सह कुम्भोदकेन प्रदक्षिणां कृत्वाश्वेभ्यः सुप्रीत उत्तमं बलिं ददाति। तथा जीमूतस्येत्यनूवाकान् चतुर्दिक्षु निक्षिपेत्। पुनराचार्याय गोचतुष्टयं दक्षिणां च दद्यात्। यथा वित्तानुसारेण तदर्धं वा तदर्धं वा ब्राह्मणेभ्यो जापकेभ्यस्त्वाचार्यार्धं प्रदापयेत्। पश्चात् शान्तिवाचनपूर्वकं ब्राह्मणान् भोजयेत्। य एव सम्यगश्वशान्तिमनुत्तमां कुरुते, स निःसंशयेन सर्वरोगेभ्यो मुच्यते। तथा वृद्धिं प्राप्नोति। नृपः सर्वदैश्वर्यं वीरलक्ष्मीं च लभते। तस्मात्सर्वप्रयत्नेनेमां शान्तिं समाचरेत्।[१५१]

### १.४.१६ गजारिष्टशान्तिः —

वृद्धवसिष्ठसंहिताग्रन्थे पञ्चत्रिंशदध्याये गजारिष्टशान्तिनामके षट्चत्वारिंशत्(४६)श्लोकाः सम्मिलिताः ।

यस्य नृपस्य समीपेऽधिकगजाः सन्ति, तदधीनाखिला धरा स्यात्। अतस्तस्माद् गजा सर्वदा पोषणीयाश्च कल्पनीयाः। तेषां पोषणं कल्पनं गजवक्त्रप्रसादतः। अतः प्रयत्नतो राज्ञैर्गणेशस्य पूजनं कार्यम्। तस्मिन्(गणेशे) सम्पूजिते ब्रह्माविष्णुमहेश्वराः, इन्द्रादिलोकपालाः, वस्वादिमरुद्गणाः प्रसन्ना भवन्ति। समस्तदेवताः–असुराः– सर्वे ग्रहाः–गन्धर्वाः–सर्पाः–राक्षसाः–सिद्धविद्याधराः–यक्षपिशाचाः–– सप्त मातृकाः–वेतालडाकिनीभूता

---

१५१ व.सं. अ.३४ श्लो. १ तः २३

मनोरथान् दिशन्ति। अतो गणेशं गजसूक्तेन सदा जपेत्। स गणेशः सदा तेषां(गजानां) पालनपोषणशोषणार्थं स्वामी स्यात्। प्राचीनकाले भगवान् शङ्करस्तस्य जन्मनि उक्तवान्।[१५२]

यदा यदा गजानां व्याधिर्जायते, तदा पूजाहोमजपादिभिः शान्तिं प्रकुर्यात्। रविवासरे, सूर्यसंक्रमणकाले, सूर्यचन्द्रयोर्ग्रहणे, विषुवत्संक्रान्तिकाले,अयने, व्यतीपातयोगे, क्षयदिने, अन्ये पुण्यदिवसे, चन्द्रताराबलोपेते समभुवि दिक्साधनं कृत्वा ईशानकोणे, देवालये, मध्याद्विनिर्गतैः, सत्रैश्चतुरस्रं कारयेत्। तथा च सूत्रमार्गेणाष्टभिर्हस्तैर्मण्डपं कारयेत्। धरातले मण्डपान्ते चतुःषष्टिदलं कृत्वा वेदिकास्थले मध्ये चतुष्पद्व्योममण्डलं द्वादशांशात्मकं व्योमवेष्टितं वायुमण्डलं च कुर्यात्। विंशांशकात्मकं व्योमवेष्टितं वाहनमण्डलं कुर्यात्। समस्तमण्डलानावेष्ट्य महीमण्डलमास्थितं, तत्राग्निमण्डलं ज्ञात्वा, दिक्षु चतुष्टयकुण्डनिर्माणं कार्यम्। प्राग्रेखामध्यमं कुण्डं द्वारं चैकांशमानतस्तथैव कुण्डद्वारं च शेषदिक्षु प्रकल्पयेत्। पूर्वोक्तलक्षणोपेतं मेखलावप्रसंयुतं तोरणाद्यैरलंकृत्य वितानं वेदिकोपरि सम्यक् संकल्पपूर्वकमाशिषोवाचनं कुर्यात्। पश्चाच्चतुर्विंशतिसंख्यकान् ऋत्विजो वरयेत्। तेषां ऋत्विजां मध्ये विद्यातपोव्रतयुतं विविधज्ञानकुशलं शुभं शिष्टतममाचार्यं प्रकल्पयेत्। तत्र मधुपर्कादिकं कृत्वा कार्यं नियोजयेत्। तथा चत्वारो ब्राह्मणान् होतृन्कुण्डेषु नियोजयेत्। द्वारेष्वष्टौ जापकान् तथा षट्संख्याकानङ्गजापकान् गन्धपुष्पादिकं दत्त्वा तत्कार्ये नियोजयेत्। पुनर्यथाविधि पञ्चविंशतिसंख्यकान् ब्राह्मणान् भोजयेत्। अक्षमालाधराब्जबीजदण्डधरा चतुर्भुजगजवक्त्र- प्रतिमा सुवर्णेन निर्मातव्या।क्रमाद् वाहनायुधवर्णादयः सर्वेषां पुरा कथिताः। तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि । तन्नो दन्तिः प्रचोदयात्। यद् वामदेवनामा ऋषिः। अस्य छन्दो गायत्री, देवता गणेशः स्यात्। अथ पूर्वोक्तद्रव्यसंयुतं चतुर्द्वारि

---

१५२ व.सं. अ.३५ श्लो. १ तः ६

कुम्भाष्टकेऽष्टदलपद्मं लिखेत्। वेदिकायां तण्डुलोपरि श्रीगणेशस्य तथा कर्णिकायां लोकपालानां दलेषु निर्माणं कार्यम्। गणेशशक्रयोर्मध्ये पद्ममष्टदलं लिखेत्। तथा पूर्ववत्क्रमात् तत्र सूर्यादिग्रहान् पूजयेत्। गणेशयमयोर्मध्ये पञ्चकोणं प्रकल्पयेत्। तत्र पूर्ववत् पञ्चमहाभूतान् अर्चयेत्।गणेशवरुणयोर्मध्ये मण्डले वर्तुलं लिखेत्। तत्र प्रयत्नेनाश्विनीकुमारावर्चयेत्। ईशानकोणे तेजसां निधिमेवं रुद्रमण्डलमर्चयेत्।आग्नेयकोणे हाटकात्मकं विष्णुमण्डलमर्चयेत्। नैर्ऋत्यकोणे वेदात्मकं ब्रह्ममण्डलमर्चयेत्। वायव्यकोणे प्रणवात्मकं मण्डलं सम्यगर्चयेत्। चतुर्वेदादिमन्त्रकैः पुरुषसूक्तेन तथा रुद्रेण पूजयेत्। अस्य प्रणवस्य ऋषिश्छन्दस्तथा देवता पूर्वं कथितः। तत्तद्वर्णैर्गन्ध–वस्त्र–पुष्पैर्धूपैर्दीपकैः सम्यगुपचाराणि दद्यात्। रक्तवस्त्रैः पूजयेत्। तत्र पूर्वदिशि गणेशस्य कुण्डं, दक्षिणे पञ्चभूतात्मकं कुण्डं, पश्चिमे दुर्गाकुण्डं तथोत्तरे ग्रहाणां कुण्डानि निर्मितव्यानि। तत्राश्विनीकुमारायोः कुण्डं निर्माय पश्चाद् ग्रहाणां हवनारम्भं कुर्यात्। दिक्कुण्डैर्दिक्षु स्वस्वमन्त्रकैर्दिग्घोमः कर्तव्यः। अनन्तरं कुण्डे स्वगृह्यविधिना हुताशनं स्थापयेत्। मुखान्ते स्वस्वकुण्डे तन्मुखाहुतिं जुहुयात्।पलाशसमिधाज्यान्नैः पृथगष्टोत्तरं शतं ग्रहहोमैः समिद्भिश्च पूर्ववत् होममाचरेत्। चतुर्वेदपारायणपरा द्विजाश्चतुर्दिक्ष्वब्लिङ्गैर्वारुणैः सूक्तैरपरैश्च कलशानर्चयेत्। विविधान्नेन नैवेद्यं बहुवाद्यैः सह समर्चयेत्। पुनः शान्तिवाचनपूर्वकं ताम्बूलानि प्रदापयेत्। एकरात्रं, त्रिरात्रं नवरात्रं वा जितेन्द्रियः सन्, अनेन विधिनेकवारं भोजनं कृत्वार्चयेत्। तिलहोमं व्याहृतिभिः सहस्रं चाष्टसंयुतमेव प्रतिदिनं सम्यग्व्रीहिभिश्च होमः पूर्वं कथितः। ततः कर्ता सम्पूर्णदिवसे पूर्णाहुतिं कुर्यात्, मन्त्रपूतोदकैः कर्ता गजान् मार्जयेत्। पुनः सम्यग्गन्धपुष्पादिभिरलङ्कृत्य हुतशेषं दद्यात्। दोषशान्त्यर्थे पञ्च दुर्गासूक्तं, रुद्रसूक्तं, पुरुषसूक्तेन पञ्चब्रह्मादिभिर्मन्त्रैर्गजशालासु मार्जयेत्।तेभ्यो सुकृतं गृहीत्वा तेभ्यो(ब्राह्मणेभ्यो) दक्षिणां समर्पयेत्। पुनराचार्यायैकविंशतिनिष्कान्दद्यात्। इतरेभ्यस्तदर्धं दद्यात्। तथा स्वशक्तितः शेषान् यजेत्। तदनन्तरं ब्राह्मणान् भोजयेत्। पश्चात् स्वयं

बन्धुभिर्भुञ्जीत। एवंप्रकारेण श्रेष्ठो नृपः सम्यच्छान्तिं कुर्यात्, सर्वान्कामानवाप्नोति। तथा गजवृद्धिं लभेत।[१५३]

१५३ व.सं. अ.३५ श्लो. ७ त: ४६